दशकुमारचरितम्

२५२

३२
२८०

उपी६ (१५ मामव)

१२५

२ भाग:

१८२

दशकुमार चरित टिका

१

॥श्रीगणेशायनमः॥श्रीरघुनाथगुरुचरणकमलेभ्योनमः॥ब्रह्मांडछत्रदंडःशतधृतिभवनांभोरुहो
नालदंडःक्षोणीनौकूपदंडःक्षरदमरसरित्पट्टिकाकेतुदंडः।ज्योतिश्चक्राक्षदंडस्त्रिभुवनविज
यस्तंभदंडोंघ्रिदंडःश्रेयस्त्रैविक्रमस्तेवितरतुविबुधद्वेषिणांकालदंडः १ अस्तिसमस्तनग
रीनिकषायमाणाशश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुजातव्याख्यातरत्नाकरमाहात्म्या
मगधदेशशेखरीभूतापुष्पपुरीनामनगरी।तत्रवीरभटपटलोत्तरंगतुरंगकुंजरमकरभीषण
सकलरिपुगणकटकजलनिधिमथनमंदरायमाणसमुद्दंडभुजदंडमंडनःपुरंदरपुरांगण
वनविहरणपरायणतरुणगणिकागणजेगीयमानयातिमानयाशरदिंदुकुंदघनसा
रनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्यारचित
दिगंतरालपूर्त्याकीर्त्याभितःसुरभितःस्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलावलयि

दश०
१

योत्स्यंति तेषामप्यंतकातिथिभवनं ३

पुरुषैःप्रभूतांप्रीतिमुत्पाद्यमदाज्ञयारहसीत्युपजग्मुः एवमस्मन्मित्राणिअतोस्माकंशुभोदर्कं
वचोवाच्यमेव अत्रभवान्याराजसूनोःसाहाय्यकार्यविश्रुतंविश्रुतंनियुक्तस्तेनाश्मकेंद्रस्य
वसंतभानोस्तत्पक्षेस्थित्वायेचानेनसहयावदश्मकेंद्रगामसहजन्महतिनेजातातावदेनमनंतव
र्मतनयभास्करवर्माणमनुसरिष्यति सर्वोतमयोभ्यसीप्रहत्तिमासाद्यसपरिजनः सुखेननि
र्वक्ष्यंति नचेद्भवानोत्रिशूलवश्योभविष्यति। भवान्याचममेत्याज्ञप्तमस्ति यदेकवारं सर्वेषांक
थयातोस्माकंयुष्माभिःसहमैत्रीमवबुध्यास्मन्मुखेनसर्वेभ्योवार्त्तामित्याकर्णयितेरश्मकेंद्रांतरं
गम्भत्पाराजसूनोर्भवानीवरंविदित्वाएवंमेवभिन्नमनसस्त्रासन् विशेषतश्चमदीयमितिवचनं
श्रुत्वातेसर्वेपिमद्वशेसमभवत् एतत्सर्वमपिवृत्तांतमवबुध्याश्मकेशेनव्यचिंतियद्राजसूनोर्मौ
लाःयाःप्रजाःताःसर्वाअप्यनेनमेवप्रभुमभिलषंति मदीयश्चबाह्यश्चाभ्यंतरोभृत्यवर्गोभिन्नमनाःखल

स्यते एवं यद्यहं क्षमामवलंब्य गृहे एव स्थास्यामि ततः समुत्पन्नोपजापं स्वराज्यमपि परित्रातुं न
शक्ष्यामि॰ अतो यावता भिन्नचित्तैः सह प्रकटयता मदाववोधकं मिथ्यावचनं न संजातं तावदेव तेन सा
कं विग्रहं रचयामीत्येवं विहिते सोवश्यं न मद्दैक्षणमवस्थास्यतीति निश्चित्यान्यायेन परराज्याक्र
मणपातकप्रेरितः स सैन्यो मृ विहिते सोवश्यं न मद्दैक्षणमवस्थास्यतीति निश्चित्यान्यायेन परस्व
राज्याक्रमणपातकप्रेरितः स सैन्यो मत्सुमुखमिव मासैन्यमभ्ययात् तमभ्यायांतं विदित्वा राजपुत्रः
पुरोभवत् अतोऽस्मकं द्वन्द्वमेव तु रणाधिरूढो यावन्नमभ्यसरं तावत्सर्वीर एव तत्सेनाय द्वयमेताव
तोपरिमितस्यास्मत्सैन्यस्यापर्यंकवाम्यागच्छति तत्रभवानीव र एव तत्र असाधारणाकारणानान्यदि
ति निश्चित्य स आलेख्यं लिखितेवावस्थिता ततो मयाभिगम्य संगराय समाहूतो वसंतभानुः समेत्य मा
मसिप्रहारेणाहृत्य महनत् अहं च शिक्षाविशेषविफलिततदसिप्रहारः प्रतिप्रहारेणातं प्रहृत्यावकृत्त

मश्मकेन्द्रशिरोवनौ विनिपात्य तत्सैनिकानवदं अतः परमपि ये युयुत्सवो भवंति ते समेत्य मया यु
ध्यंतु न चेद्राजतनयचरणप्रणामं विधाय तदीयाः संतः स्वस्ववृत्त्युपभोगपूर्वकं निजान्निजानधि
कारान्निःशंकं परिपालयंतः सुखेनावतिष्ठंतु इति मद्वचनश्रवणासमनंतरं सर्वेप्यश्मकेन्द्र
सेवकाः स्वस्ववाहनात्सहसावतीर्य्य राजसूनुमानम्य तद्वशवर्त्तिनः समभवन् ततोहं तदश्मके
न्द्रराज्यं राजसूनुसाद्विधाय तद्रक्षणार्थं मौलान्स्वानधिकारिणो नियुज्यात्मीभूतेनाश्मकेन्द्रसैन्येन
च सार्कं विदर्भामभ्येत्य तत्स्यांतराजननयं भास्करवर्माणं अभिषिच्य पित्र्ये पदे न्यवेशयं एकसर्व
मात्रा वसुमत्या सहावस्थितं तं राजानं व्यजिज्ञपं मया एकस्य कार्यस्यारंभश्चिकीर्षितोऽस्ति स
यावन्न सिध्यति तावन्मया न कुत्राप्येकत्रावस्थातुं शक्यं अतस्त्वं मद्भार्यां त्वद्भगिनीं मंजुवादिनीं कि
यंत्सहानि गुप्यमंतिकमेवातिष्ठंतो अहं च यावदिष्टजनोपलंभं कियंतमप्यनेहसं भुवं विभ्रमत

मासाद्य पुनरत्र समेष्यामि इत्याकर्ण्य मात्रानुमतेन राज्ञाहमगादि यदस्माकमेतद्राज्यमायत्तं मल
क्षणास्यैतावतोभ्युदयस्यासाधारणो हेतुस्त्वमेव त्वं विनाक्षणमप्यस्माभिरियं राज्यधूर्न निर्वोढ्या
अतः किमेवं वक्ति भवानित्याकर्ण्य मयाप्रत्यवादि युष्माभिरयं चिंतालवोपि न चित्ते चिंतनीयः यु
ष्मद्गृहे यः सचिवरत्नमार्यकेतुरस्ति स ईदृग्विधानामनेकेषां राज्यानां धुरमुद्वोढुं शक्तः ततस्तं
तत्र नियुज्याहं मिष्यामीत्यादिवचनसंदोहैः प्रलोभितोपि सजननीको नरपोनेकैराग्रहैर्मां किंच
त्तमपि कालं प्रयाणोपक्रमान्निरवर्तयत उत्कलाधिपतेः प्रचंडवर्मणः स्वराज्यमलंघप्रासादात् अ
हं च तद्राज्यमात्मसात्कृत्वा राजानमामंत्र्य यावत्त्वदन्वेषणाय प्रयाणोपक्रमं करोमि तावद्देवांगना
र्थ्येन सिंहवर्मणा स्वसाहाय्याया कारितोत्र समागतः एवं पुण्यपरिपाकात्स्वामिना समगंसिषि
ततस्ते तत्र संगता अपहारवर्मोपहारवर्मार्थपालप्रमतिमित्रगुप्तमंत्रगुप्तविश्रुताः कुमाराः पाद

लिपुरस्योवराज्यमुपभुंजानंसमाकारयोएवंकृतसंकेतंवामलोचनयाभार्ययासहकुमारंसो
मदत्तंसेववैकेरानाय्यसराजवाहनःसंभूयावस्थितामिथःप्रमोदसंवलिताकथायावद्वि
दधातितावत्पुष्पपुराद्राज्ञोराजहंसस्यआज्ञापत्रंआदायचलिताकथायावद्विदधातितम
वत्पुष्पपुराद्राज्ञोराजहंसस्यआज्ञापत्रंआदायसमागताराजपुरुषाःप्रणम्यराजवा
हनंव्यज्ञिज्ञपन् स्वामिन्नेतत्जनकस्यराजहंसस्याज्ञापत्रंगृह्यतांइत्याकर्ण्यसमुत्थाय
भूयोभूयःसादरंप्रणम्यसहसितदाज्ञापत्रमग्रहीत् शिरसिचाधायततउन्नायउत्कील्य
राजाराजवाहनःसर्वेषांश्रावितामेववाचयत् स्वस्तिश्रीपुष्पपुरेराजधान्यांश्रीराजहंस
भूपतिरवंपानगरीमधिवसतःराजवाहनप्रमुखान्कुमारान्आशास्यआज्ञापत्रंप्रेष
यति यथास्वपमितोमामामंत्र्यप्रणम्यप्रस्थिताःपथिकस्मिंश्चिद्वनोद्देशेउपशिबालयंसं

उ.पी.का.
४

धावारमवस्थाप्यस्थिताः तत्रराजवाहनंनिशिविषहज्ञार्थंनिशिशिबालयेस्थितंप्रातरनुपलभ्य
अवशिष्टाःसर्वेअपिकुमाराःसहैवराजवाहनेनराजहंसंप्रणंस्यामः नचेत्आगांस्यस्या
मइतिप्रतिज्ञायसैन्यपरावृत्यराजवाहनमन्वेष्टुंपृथक्प्रतिदिशंप्रस्थिताः एतद्वृत्तान्तं
ततःप्रत्यागतानांसैनिकानांमुखादाकर्ण्यासह्यदुःखोदन्वतिमग्नमनसावुभौअहंपुष्प
ऽजननीचवामदेवाश्रमंगत्वाएतद्वृत्तान्तंतन्निवेदितंविधायप्राणपरित्यागंकुर्वावइतिनिश्चित्य
तदाश्रममुपगतौतन्मुनिंप्रणम्ययावत्स्थितौतावद्देवतेनत्रिकालवेदिनामुनिनाविदितमेवा
स्मन्मनीषितं निश्चयमववुध्यप्रोवाचि राजन्मयाप्रथममेवैतत्सर्वंयुष्मन्मनीषितंविज्ञान
वतावज्ञापि यदेतत्कुमाराराजवाहननिमित्तंसमयंकिंयंतमप्यनेहसंआपदमासाद्यभाग्यो
दयात् असाधारणानविक्रमेणाविहितदिग्विजयाःअभ्यन्तानिराज्यानुपलभ्यषोडशाब्दान्तेवि

राम.
४

२

उदयिनं राजवाहनं पुरस्कृत्य अस्येयत्नव वसुमत्याश्च पादानभिवाद्य भवदाज्ञाविधायिनो भविष्यति
अतस्तं मिमित्र किमपि मार्हे संनविधेयमिति मुनिवचनं हृदि निधाय राजहंसस्तु चिंतमत्वा सु
निना यथाभिधीयते तथैवाक्रमाः तेऽपि सर्वे तत्र राज्ञा प्रमाणीकृता तेषां तत्पितुर्वानप्रस्थाश्रमग्र
हणोपक्रमनिषेधे भूयांसमाग्रहं विलोक्य मुनिस्तानवदत् भोकुमारकाः अयं पुष्पज्जनकः
सत्वदयः समुचितेऽपि वर्तमानः कायक्लेशं विनैव मनसाश्रमस्थोवानप्रस्थाश्रमाश्रयणोस
र्वथा भवद्भिर्न निवारणीयः अत्रस्थितस्त्वयं भवद्भक्तिमुपलप्स्यते भवंतश्चपितरं सन्निधौ न
सुखमवाप्स्यतीति महर्षेराज्ञामधिगम्य ते पितुर्वानप्रस्थाश्रमाधिगमप्रतिषेधाग्रहमत्यजन्
ततो राज्ञो वसुमत्याद्देव्याश्च समक्षं नाम देवो राजवाहनप्रमुखानां दशानामपि कुमाराणामभि
लाषविज्ञायतानाज्ञापयत् भवंतः सर्वेपि एकवारेण त्वास्त्वानि स्वानि राज्यानि न्यायेन परिपा

लयंतुपुनर्यदेवाभवतितदापित्वोश्चरणाभिवंदनायागंतव्यंइति ततस्तेसर्वेपिकुमारास्तन्मुनि
वचनंशिरस्याधायतंप्रणम्यपितरौचनीत्वावामदेवाश्रमंगत्वातत्रतंप्रणम्यतैश्चतच्चरणाभिवा
दनंकारयित्वाराजहंसेनवसुमत्याचाज्ञप्तास्तेवामदेवाज्ञयाप्रयाणाद्दिग्विजयंविधायप्रत्या
गमनंततःस्वस्ववृत्तंपृथक्पृथक्मुनिसमक्षंन्यवेदयन्पितरौचकुमाराणांनिजपराक्रमावबो
धकानिचरित्रानिदुर्घटानिचरितान्याकर्ण्यपरमानंदमाप्नुतांततोराजामुनिंसविनयंव्यजिज्ञपत्
भगवंस्तवप्रसादादस्माभिर्मनुजमनोरथाधिकमवाप्यनसगोचरंसुखमधिगतं अतःपरं
ममस्वामिचरणसंनिधौवानप्रस्थाश्रममधिगत्यात्मसाधनमेवविधातुमुचितं अतःपुष्पपुर
राज्येमानसाररान्येचराजवाहनमभिषिच्यअवशिष्टानिराज्यानिनवभ्यःकुमारेभ्योयथोदितं
संप्रदायतेकुमाराराजवाहनाज्ञाविधायिनस्तदेकमत्यावर्तमानाश्चतुरुदधिवलयांवसुंधरांस

मुद्धृत्यकंटकानुपभुंजंतेतथाविधेयंस्वामिनेति तदाकर्ण्यतत्सत्यपाऽदेयमवलंब्याप्युप्रभर्त्सद्द
देवीचप्राणानधारयतां इदानीमासन्नवर्तिव्यवधीवामदेवाश्रमेगत्वाविज्ञप्तिः कृता स्वामि
न्नलदुक्तावधिःपूर्णप्रायोभवतितत्सविहतिश्चमाद्यापिविज्ञायते इतिश्रुत्वामुनिरवदत् राज
न् राजवाहनप्रमुखाःसर्वेपिकुमाराश्चानेकान्दुर्जयान्शत्रून्विजित्यदिग्विजयंविधायभूवलं
यंवशीकृत्यचंपायामिकत्रस्थिताःस्तत्रापत्रमादायतदानयनायप्रेष्यतांशीघ्रमेवसेवकाः इ
तिमुनिवचनमाकर्ण्यभवदाकारणायाज्ञापत्रंप्रेषितमस्ति॰ अतःपरंचेत्क्षणमपियूयंविलंबंवि
धास्यथततोमांवसुमतींचमातरंकथावशेषावेवश्रोष्यथेतिज्ञात्वायानीयमात्रमपिपथिभत्लापे
यमितिएवंपितुराज्ञापत्रंमर्ध्वविधत्स्वेतरितिनिश्चित्यअथमेताहकूशत्रूणामवशिष्टान्यास्मद्व
शीकृतानिराज्यानिशंक्ष्येस्याक्रमितुंतथापितद्रक्षापर्याप्तानिसैन्यानिसमर्थतरान्पुरुषानात्मस्था

उत्त॰पी॰का
६
6

निस्थानेनियुज्यकियतासैन्येनमार्गरक्षांविधायएवंवैरिणांमालवेशंमानसारंपराजित्यतद्धिरा
ज्यंवशीकृत्यपुष्पपुरेराज्ञोराजहंसस्यदेव्याववसुमत्याश्चपादान्नमस्यामः एवंनिश्चित्यपूर्वोक्तप्र
कारेणतत्तद्रक्षायैतांस्तान्नियुज्यस्वस्वभार्यासंयुताः परिमितेनसैन्येनसहमालवेशंअतिप्रस्थि
ताः प्राप्यचोज्जयिनींतदेवसहायमन्तैस्तैः कुमारैः परिवृतेनराजवाहनेनातिबलवानपिमाल
वेशोमानसारः क्षणेनपरिजित्यनिहतश्च ततस्तद्दुहितरमवंतिसुंदरीसमादायचंडवर्मणातन्म
त्रिणाएवंकारागृहेरक्षितंपुष्पोद्भवकुमारंसकुटुंबंततउन्मोचितंसहनीत्वातदातद्राज्यंवशीकृ
त्यतद्रक्षणायकांश्चित्सैन्यसहितान्मंत्रिणोनियुज्यावशिष्टपरिमि तसैन्यसहितास्तेकुमाराः
पुष्पपुरंसमेत्यराजवाहनंपुरस्कृत्यतातस्यराजहंसस्यमातुर्वसुमत्याश्चचरणानभिवंद्यतैश्चपुत्र
समागमंप्राप्यपरमानंदमधिगतोतत्सर्वमेवराजवाहनप्रमुखादशकुमारास्तत्प्रणाम्यतदातत्पयाम्र

राम॰
६

उत्त॰पी॰
७
7

चलिताः राजवाहनं पुष्पपुरे ऽवस्थाप्य तदनुज्ञया सर्वे परिजनाः स्वानि स्वानि राज्यानि प्रतिपाल्य
स्वेछया पित्रोः समीपे गतागतमकुर्वन् एवमवस्थितास्ते राजवाहनप्रमुखाः सर्वेपि कुमाराः
राजवाहनाज्ञया सर्वमपि वसुधावलयं न्यायेन परिपालयन्तः परस्परमैकमत्येन वर्त्तमानाः
पुरंदरप्रभृतिभिरपि अतिदुर्लभानि राज्यसुखानि अन्वभवन्॥ ॥इति श्री दंडिना विरचिते द
शकुमारचरिते विश्रुतचरितं नाम नवमोच्छ्वासः उत्तरपीठिका समाप्ता॥ ॥छ॥ ॥छ॥

राम॰
७

काव्यदसकुमारचर्नं उतपीटका

६००

७२ पत्रा ४५

तरुणीरमणीसौभाग्यभोगभाग्यवाननवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासु
रभूस्मरनिकरोविरचितारातिसंतापेनप्रतापेनसततंतुलितवियन्मध्यहंसोराजहंसोनामघनद
र्पकंदर्पसौंदर्यसोदर्यहृद्यनिरवद्यरूपोभूपोबभूवःतस्यवसुमतीनामसुमतीलीलावतीकु
लशेखरमणीरमणीबभूव।रोषरूक्षरोननिटिलाक्षेणभस्मीकृतचेतनेमकरकेतनेतदाभय
नानवद्यावनितेतिमत्वातस्यारोलंबावलीकेशजालंप्रेमाकरोरजनीकरोविजितारविंदंवदनंज
यध्वजायमानोमीनोजायायुतोऽक्षियुगलंसकलसैनिकांगवीरोमलयसमीरोनिश्वासःपथि
कहृद्दलनकरवालःप्रवालश्चाधरबिंबंजयशंखोबंधुरालावण्यधराकंधरापूर्णकुंभौचक्र
वाकानुकाशेययोधरौआयमानेमार्दवासमानेविसलतेचबाहूईषदुत्फुल्ललीलावतंसकल्हा
रकोरकांगगावर्त्तसनाभिर्नाभिःदूरीकृतयोगिमनोरथोजैत्ररथोऽतिघनंजघनंजयस्तंभभूतेसौ

दर्पेभूते विघ्नितयतिजनारंभे रंभे चोरुयुगं। आतपत्रसहस्रपत्रं पादद्वयमस्त्रभूतानि प्रसूनानि तानी
तराण्यंगानि च सममभूवन्निव विजितामरपुरे पुष्पपुरे निवसता सानंतभोगलालितावसुमती वसु
मती व मगधराजेन यथासुखमन्वभावि। तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेया
धीरधिषणावधीरितविबुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन्। तेषां सितवर्मणः सुम
तिसत्यवर्माणौ धर्मपालस्य सुमंत्रसुमित्रकामपालाः पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः स
मभूवन्। तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुध्वा तीर्थयात्राभिलाषी देशांतरमगमत्। विटनटवा
रनारीपरायणो दुर्विनीतः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवो
पि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मंत्रिसूनवः पुरंदरपुरातिथिषु पितृषु यथा
पूर्वमन्वतिष्ठन्। ततः कदाचिन्नानाविधमहदायुधेन पुरापरचितागारापज्जन्यराजन्यमौलिपालिनि

हितनिशितसायकोमगधनायकोमालवेश्वरप्रत्यग्रसंग्रामघस्मरंसमुत्कटमानसारंमानसारंप्र
त्तिसहेलंम्पकृतलललधिनिर्घोषाहंकारेणाभेरीभांकारेणाहठिकाकर्णानाक्रांतभयचंडिमानंदि
ग्दंतावलवलयंविघट्टयन्निजभरनमन्मेदिनीभरणायस्तभुजगराजमस्तकवलेनचतुरंगव
लेनसंयुतःसंग्रामाभिलाषेणारोषेणमहताविष्टानिर्ययौ।मालवनाथोप्यनेकानेकपरूप
सनाथो·विग्रहःसविग्रहइव·साग्रहोभिमुखोभ्ययभ्ययौ।निर्जगामातयोरश्वरथतुरगखुर
क्षुण्णक्षोणीसमुद्भूते·करिघटाकूटस्रवन्मदधाराधौतमूले·नव्यवल्लभवरणागतदिक्कन्
न्याजनजवनिकापटमंडपइवविपत्तलव्याकुलेधूलीपटलेदिविषदध्वनिधिकृतान्तध्वनिप
टहध्वानवधिरितनाशेषदिगंतराले·शस्त्राशस्त्रिहस्ताहस्तिपरस्पराभिहतसैन्यंजन्यमजनि।त
त्रमगधराजःप्रक्षीणसकलसैन्यमंडलंमालवराजंजीवग्राहमभिगृह्यकृपालुतयापुनरपि

द.प.
२
3

स्वराज्येप्रतिष्ठापयामास।ततःसरत्नाकरमेखलामिलामनन्यशासनांशासन्ननपत्यतयानारायणांस
कललोकैककारणंनिरंतरमर्चयामास।अथकदाचित्तस्यमहिषीदेवीदेवेनकल्पवल्लीफलमा
देहीतिप्रभातसमयेस्वप्नमवलोकितवतीसातदादयितमनोरथपुष्पभूतंगर्भमधत्त।राजासंप
न्नहृताखंडलःस्फुहृन्नृपमंडलंसमाहूयनिजसंपन्नमनोरथानुरूपंदेव्याःसीमंतोत्सवमधत्त
।एकदाहितैःसुहृन्मंत्रिपुरोहितैःसभायांसभायांसिंहासनासीनोगुरोरहीनोललाटतटन्यस्तांज
लिनाद्वारपालेनव्यज्ञापिदिव्यदेवसंदर्शनलालसमानसःकोपिदेवेनविरच्यार्चनार्होयतिर्द्वारदेश
मध्यास्तइति।तदनुज्ञातेनतेनससंयमीन्द्रःसमीपमनायिभूपतिरायांतंतंविलोक्यसम्यक्ज्ञाततदी
यगूढचारभावोनिखिलमनुचरनिकरंविसृज्यमंत्रिजनसमेतःप्रणामितमेनंमंदहाससमभाषत।नतुता
पसदेशंसायदेशंभ्रमन्भवांस्तत्रतत्रभवदभिज्ञातंकथयत्विति।तेनाभाषिभूसुत्रामणावलिनाप्रांजलिना

रा.भ.
२

देवशिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य मालवेंद्रनगरं प्रविश्य तत्र गूढतरं वर्तमानस्तस्य
राज्ञः समस्तमुदंतजातं विदित्वा प्रत्यागमं मानीमानसारः स्वसैनिकायुष्मत्तांतराये संपराये भवतः
पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदर्पो महाकालनिवासिनं कालोविलासिनमनश्वरम
हेश्वरं समाराध्य तपः प्रभावसंतुष्टात्स्मादेव वीरारातिघ्नीं भयदां गदां लब्ध्वात्मानमप्रतिभटंम
न्यमानो महाभिमानो भवंतमभियोक्तुमुपक्रंते· ततः परं देव एव प्रमाणमिति। तदालोच्य निश्चितकृ
त्यैरमात्यै राजा विज्ञापितो भूत्। देव निरुपायेन दैवसहायेन योद्धुमरातिरायाति। तस्मादस्माकं यु
द्धं सांप्रतमसांप्रतं। सहसा दुर्गसंश्रयः क्रियतामिति तैर्बहुधा विज्ञापितोप्यखर्वगर्वेण विराजमा
नो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमना बभूव। शितिकंठदत्तशक्तिसारो मानसारो मान
सारो योद्धुमनसामग्रीभूयसामग्रीसमेतो क्लेच्छां मगधदेशं प्रविवेश। तदा तदाकर्ण्य मंत्रिणो भूम

द.पू.
४

हेंद्रंमगधेंद्रंकथंचिदनुनीपरिपुभिरसाध्येविंध्याटवीमध्येवरोधान्मूलबलरक्षितान्निवेशया
मासुःराजहंसस्तत्रप्रशस्तवीतदैन्येसैन्यसमेतस्तीव्रगत्यानिर्गत्याधिकरुषंद्विषंरुरोधःपरस्परब
द्धवैरयोरेतयोस्तदातदालोकनकुतूहलागतगगनचराश्चर्यकारणेरणेवर्तमानेजयाकांक्षीमा
लवदेशरक्षीविविधायुधस्थैर्यचर्यांचितसमरतुलितामरेश्वरस्यमगधेश्वरस्यतस्योपरिपुरापु
राऱातिदत्तांगदांप्राहिणोत्।निशिततरशरनिकरशकलीकृतापिसापशुपतिशासनस्यावंध्यतयासूतं
निहत्यरथस्थंराजानंमूर्छितमकार्षीत्।ततोवीतप्रग्रहाअक्षतविग्रहावाहारथमादायदैवगत्या
न्तःपुरशरण्यंमहारण्यंप्राविशन्।मालवनाथोजयलक्ष्मीसनाथोमगधराज्यंप्राज्यंसमाक्रम्यपुष्प
पुरमध्यतिष्ठत्।तत्रहेतितिहतिश्रांताअमात्यादैवगत्याप्रसुत्क्रांतजीवितानिशांतवातलब्धसंज्ञाः
कथंचिदाश्वस्यराजानंसमंतादन्वीक्ष्यानवलोकितवंतोदैन्यवंतोदेवीमवापुः।वसुमतीतुनिखिल

एम.
४

सैन्यक्षतिरागतो दृष्टपलं चाकर्ण्यापश्चिमाशोकसागरमग्ना रमणानुगमने मतिं व्यधत। कल्याणाभिरूरमता
मरणामनिश्चितं किंच दैवज्ञकथितो मथितोऽद्भुताराति: सार्वभौमो भिरामो भविता सुकुमार:कुमारस्त्व
दुदरे वसति तस्माद्यत्नवमरणामनुचितमिति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानया तया क्षणांक्ष
णाहीनयातृष्णीमस्थायि। अथार्धरात्रे निद्रानिलीढनेत्रे परिजने विजने शोकपारावारपारमुत्तर्तुम
ना कुर्वती सेनानिवेशाद्देशान्निःशब्दं लेशं शनैरतिक्रम्य यस्मिन्नुरथस्य संसक्ततया तदानयनपला
यनश्रांता गंतुमक्षमाः क्षमापतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठन् तस्य निकटवटतरोः शाखायां म
तिरेखायामिव क्वचिदुत्तरीयार्धेन वंधनं मृतिसाधनं विरच्य मर्तुकामा वाष्पाधरी विरसीकृतकलकं
ठा साश्रु कंठाव्ययत। लावण्योपमितपुष्पसायक भवानेव भाविन्यपि जन्मनि वल्लभो भव त्विति। तद
कर्ण्य नीहारकरकिरणनिकरसंपर्कलब्धावबोधो मागधो गाधरुधिरचिरक्षरणानष्टचेष्टो देवी वाक्य

मेवनिश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्तामाश्वासयत्। सा ससंभ्रममागत्यामंदहृदयानंदसंफु
ल्लवदनारविंदा तमुपोषिताभ्यामिवानिमिषिताभ्यां लोचनाभ्यां सत्याप्यविकस्वरेण स्वरेण पुरोहि
तामात्यजनमुच्चैराहूयतेभ्यस्तमदर्शयत्। राजानिटिलतटचुंबितनिजचरणाब्जैः प्रशंसितदैव
माहात्म्यैरमात्यैरभाणि। देव रथ्यचयः सारथ्यपगमे रथं रभसादरण्यमनयदिति। तत्र निहितसैनि
कया मे संग्रामे मालवपतिनाराधितपुरारातिना प्रहितया गदया दयाहीनेन ताडितो मूर्छामागत्या
त्र निशांतपवनेन बोधितोऽभवमिति महीपतिरकथयत्। ततो विरचितमहेन मंत्रिनिवहेन विरचितदै
वानुकूल्येन कालेन शिबिरमानीयापनीताशेषशल्यो विकसितहिज्ञाननारविंदो राजा सहसा विरो
पितव्रणोकारि। विरोधिदैवधिक्कृतपुरुषकारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधिरमात्यसंम
त्यामृदुभाषितया तयावसमत्यामत्याचकलितया समबोधि देव सकलस्य भूपालकुलस्य मध्ये तेजो

रिष्ठोगरिष्ठोभवानघवनमध्यंनिवसतीतिजलबुद्बुदसमानाविराजमानासंपत्तडिल्लतेवसहसैवो
दयतिनश्यतिच।तन्निखिलदैवायत्तमेवावधार्यकार्यं।किंचपुराहरिश्चंद्ररामचंद्रमुख्याअसंख्या
महीन्द्राऐश्वर्योपमितमहेन्द्रादैवतंत्रदुःखयंत्रंसम्यगनुभूययस्मादनेककालंनिजराज्यमकु
र्वन्।तद्वदेवभवानपिभविष्यतिकिंचनकालंविरचितदेवसमाधिर्गताधिस्तिष्ठतुतावदिति।ततःसक
लसैन्यसमन्वितोराजहंसस्तपोविभ्राजमानंवामदेवनामानंतपोधनंनिजाभिलाषावाप्तिसा
धनंजगाम।तंप्रणम्यतेनकृतातिथ्यस्तस्मैकथितकथ्यस्तदाश्रमेहरीकृतश्रमेकिंचनकालमुषि
त्वानिजराज्याभिलाषीमितभाषीसोमकुलावतंसोराजहंसोमुनिमभाषत।भगवन्मानसारःप्रबलेन
दैवबलेनमांनिर्जित्यमद्राज्यंराज्यमनुभवति।तद्वदहमप्युग्रतपोविरच्यतमरातिमुन्मूलयिष्यामिलो
कन्नारोपनभवत्कारुण्यपनेतिनियमवंतंभवंतंप्राप्तुवमिति।ततस्त्रिकालज्ञस्तपोधनोराजानमवोचत्।

द॰ पू॰
६
6

सखेव्रशरीरकार्श्यकारिणातपसालं।वसुमतीगर्भस्थःसकलरिपुकुलमर्द्दनोराजनंदनोनूनंसंभ
विष्यतिकिंचनकालंतत्क्षीमास्वेतिगगनचारिणापायिवाचासत्यमेतदितितदैवावोचिराज्ञापिमुनि
वाक्यमंगीकृत्यातिष्ठत।ततःसंपूर्णगर्भदिवसावसुमतीसुमुहूर्तेसकललक्षणलक्षितंसुतम
सूत।ब्रह्मवर्चसेनतुलितवेधसंपुरोधसंपुरस्कृत्यकृत्यविन्महीपतिःकुमारंसुकुमारंजातसं
र्मसंस्कारेणावालालंकारेणाचविराजमानंराजवाहननामानंव्यधत्त।तस्मिन्नेवकालेसुमतिसुमंत्रसु
मित्रसुश्रुतानांमंत्रिणांप्रमतिमित्रगुप्तमंत्रगुप्तविश्रुताख्यामहदभिख्याःसूनवोनवोद्यदिंदुरुच
श्चिरायुषःसमजायंत।राजवाहनोमंत्रिपुत्रैरात्ममित्रैःसहबालकेलीरनुभवन्नवर्धत।कदाचिदेकेन

रम॰
६

तापसेनरसेनराजलक्षणविराजितंकंचिन्नयनानंदकरंसुकुमारंकुमारंराज्ञेसमर्प्यावोचि।भूव
ल्लभकुशसमिदानयनायवनंगतेनमयाकाचिदश्रणरायाव्यक्तकार्ष्यराणाश्रूमुंचतीवनिताविलो

कितानिर्जने किंनिमित्तं रुद्यतेत्वयेति पृष्टासाकरुणहेरम्बप्रमदम्भसगद्गदं मामवोचत तात मुनेल्ला
वण्यापजितपुष्पसायकस्य मिथिलानायकेकीर्तिव्याप्तसकलधर्मराशिनिजसुहृदो मगधराजस्यसी
मंतिनीसीमंतमहोत्सवाय पुत्रदारसमन्वितेपुष्पपुरमुपेत्य कंचनकालमधिवसतिसमाराधि
तगिरीशोमालवाधीशोमगधराजंयोद्धुमभ्यगात।तत्रप्रख्यातयोरेतयोरसंख्येसंख्येवर्तमानेसु
हृत्साहाय्यकंकुर्वाणोनिजबलेसतिविधेयेविदेहेश्वरोजयवतारिपुणाभिगृह्यकरुणयापुना
नविसृष्टोहतावशेषेणाल्पेनसैन्येनसहस्वपुरगमनमकरोत्।ततोवनमार्गेणदुर्गेणागच्छ
न्नधिकबलेनशबरबलेनरभसादभिहन्यमानोमूलबलाभिरक्षितावरोधःसमहानिरोधःपलायि
ष्ट।।तदीयार्भकयोरार्यमयोर्धात्रीभावेनपरिकल्पिताहमदुहिताथितीव्रगतिंभूपतिमनुगंतुमक्ष
मेअभवंतत्रविवृतवदनःकोपिरूपीकोपडवब्याघ्रोमामाघ्रातुमागतवान्।भीताहमुदग्ययात्रीम

द.पू.
७

वलंतीपर्य्यटंत।मदीययागिराभ्रष्टोवालकःकस्यापिकपिलाशावस्यक्रोडमभ्यलीयत।तच्छ्रुत्वाकर्षि
गोमर्षिगोव्याघ्रस्यप्राणान्द्वाणोवाणासनयंत्रमुक्तोपाहरत।विलोलालकोवालकोपित्राबैर
दायकुत्रचिदुपानीयत।कुमारमपरम्मुद्वहंतीमदुहिताकुत्रगतानजाने।साहंमोहंगताकेनापिकृ
पालुनाहृत्स्त्रियालेनस्वकुटीरमानीयरूपविरोपितव्रणाभवं।ततःस्वस्थीभूयभूयःक्ष्माभर्त्तुरंतिकमुप
तिष्ठासुरसहायतयादुहितुरनभिज्ञाततयाचव्याकुलीभवामीत्यभिदधानाएकाकिन्यपिस्वामि
नंगमिष्यामीतिसातद्देवनिरगात। अहमपिनवमित्रस्यविदेहनाथस्यविपन्निमित्तंविषादम
उभवन्।तदन्वयांकुरंकुमारमन्विष्यन्तद्देकंचंडिकामंदिरंस्कंदरंध्रागां।तत्रसंततमेवंविधविजय
सिद्धयेकुमारंदेवतायपहारंकरिष्यंतःकिराताःमहीरुहशाखावलंबितमेनमसिलतयावासेकृतत
लेखननिक्षिप्तचरणालक्षीकत्यशितशरनिकरेणवानेकचरणोःपलायमानंकुक्कुरवालकेर्वी

एम.
७

यित्वा सह निष्क्रामेति भाषमाणा मया सममभ्यभाष्यत॰ ननु किरातोत्तम घोरप्रचारे कांतारे स्खलितप
थः स्थविरो भूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किंचिदंतरमगच्छं। स कुत्र
गतः केन वा गृहीतः परीक्ष्यापि न वीक्ष्यते॰ तन्मुखालोकनेन विना नेकान्यहान्यतीतानि किं करोमि
क्व यामि भवद्भिर्न किमदर्शीति। द्विजोत्तम कश्चिदत्र तिष्ठति किमेष तव नंदनः सत्यमेव तदेनं गृहाणे
त्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन्॰ तेभ्यो दत्ताशीरहं बालकमंगीकृत्य शिशिरोदकादिनोपचारेणा
श्वास्य निःशंकं भवदंकं समानीतवानस्मि। एनमायुष्मंतं पितृरूपो भवानभिरक्षतादिति। राजा सुहृदाप
न्निमित्तं शोकं तत्तनयवदनविलोकनसुखेन किंचिदधरीकृत्य तमुपहारवर्मनाम्नाहूय॰ राजवाहन
मिव पुपोष। जनपतिरेकस्मिन्दिवसे तीर्थस्नानाय पक्कणाविकटमार्गेणागच्छन्नवलया कयाचिदुपला
लितमनुपमशरीरं कुमारं कंचिदवलोक्य कुतूहलाकुलस्तामपृच्छत्। भामिनि रुचिरमूर्तिः स राजगुणा

द०पू०
८
8

संप्रतिरसावर्भकोभवदन्वयसंभवोनभवतिकस्यनयनानंदनोनिमित्तेनकेनभवदधीनोजातःकथ्यतां
याथातथ्येनत्वयेति।प्रणतयातयाचार्यासलीलमलापि।राजन्नात्मपल्लीसमीपेपदव्यांवर्त्तमानस्य
मिथिलेश्वरस्यसर्वस्वमपहरतिशबरसैन्येमद्दयितेनापहृत्यकुमारएषमह्यमर्पितोव्यवर्धत।तद्वधा
र्यकार्यज्ञोराजामुनिकथितंद्वितीयंराजकुमारमेवनिश्चित्यसामदानाभ्यांतामनुनीयापहारवर्मेत्या
ख्यायदेव्यैवर्धयेतिसमर्पितवान्॥कदाचिद्वामदेवशिष्यःसोमशर्मानामकंचिदेकंबालकंराज्ञःपु
रोनिक्षिप्याभाषत।देव०रामतीर्थेस्नात्वाप्रत्यागच्छतामयाकाननावनौवनितयाकयापिधार्यमाणा
मेनमुज्ज्वलाकारंकुमारंविलोक्यसादरमभाणि।स्थविरेकात्वमेतस्मिन्नटवीमध्येबालकमुद्वहन्तीकि
मर्थमायासेनभ्रमसीति।वृद्धयाप्यभाषि।मुनिवरकालयवननाम्निद्वीपेकालगुप्तोनामधनाढ्योवै
श्यवरःकश्चिदस्ति।तत्तनयांनयनानंदकारिणींसुवृत्तांनामैतस्माद्द्वीपादागतोमगधनाथमंत्रिसंभ

राम०
८

वीरत्नोद्भवो नाम रमणीयगुणालयो भ्रांतभूवलयो मनोहारी व्यवहारी उपयम्य स्कवस्तु संपदा श्व
शुरेणा संमानितोभूत्। कालक्रमेण नतांगी गर्भिणी जाता। ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः
कथंचित्श्वशुरमनुनीय चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे। कल्लोलमालि
काभिहतः पोतः समुद्राम्भस्यमज्जत्। गर्भभरालसां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहंती
फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमं। सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनो
पायेन तीरमगमद्वा न जानामि। क्लेशस्य परां काष्ठामधिगताहमस्मिन्नटवीमध्ये सुतमसूत। प्रस
ववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति। विजने वने स्थातुमशक्यतया जनपदगामिनं
मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गंतुमनुचितमिति कुमारोप्यना
यीति। तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत। तं विलोक्य भीता सा तं निपात्य प्राद्रवत्। अहं समीप

लतागुल्मकंप्रविश्यपरीक्ष्यमाणोतिष्ठं॰निपतितंबालकंपल्लवकवलमिवाददतिगजपतौकंठीर
वोभीमरवोमहाग्रहेणान्यपतत्॰भयाकुलेनदंतावलेनझटितिवियतियात्यमानोबालकोन्यपत
त॥चिरायुष्मतयासन्योग्रोधतरुशाखासमासीनेनवानरेणाकेनचित्पक्वफलमनीषयापरिगृह्यफले
तरतयावितत्स्कंधमूलेनिक्षिप्तोभूत्सोपिमर्कटःक्वचिदगातबालकेनसत्वसंपन्नतयासकलक्लेश
सहेनाभावि।केसरिणाकरिणांनिहत्यकुत्रचिदगामिलतागृहान्निर्गतोहमपितेजःपुंजंबालंशनैर
वनीरुहादवतार्यवनांतरेवनितामन्विष्याविलोक्यैनमानीयगुरवेनिवेद्यतन्निदेशेनभवन्निकटमा
नीतवानस्मीति।सर्वेषांसुहृदामेकदैवानुकूलदैवाभावेनमहदाश्चर्यंबिभ्राणोराजारत्नोद्भवःकथ
मभवदितिचिंतयन्तत्तनयंदंतपुष्पोद्भवनामधेयंविधायतदुदंतंव्याख्यायसश्रुतायविषादसंतोषा
वनुभवन्तदनुजेतनयंसमर्पितवान्अन्येद्युःकंचनबालकमुरसिदधतीवसुमतीवल्लभमभिगत

नकुत्रत्योसाविति पृष्टःसमभाषत॰राजन्नतीतायांरात्रौकाचन दिव्यवनितामत्पुरतःकुमारमेकंसंस्था
प्यनिद्रामुद्रितंमांविबोध्यविनीताब्रवीत॰ देवत्वन्मंत्रिणोधर्मपालनंदनस्यकामपालस्यवल्लभा
यक्षकांताहं॰तारावलीनामनंदिनीमाणिभद्रस्ययक्षेश्वरानुमत्यामदात्मजमेतंभवत्तनूजस्याभो
निधिवलयवेष्टितक्षोणीमंडलेश्वरस्यभाविनोविशुद्धयशोनिधेराजवाहनस्यपरिचर्याकरणा
यानीतवत्यस्मि।त्वमेनंमनोजसन्निभंवर्धयेति।विस्मयविकसितनयनयामयासविनया॰सत्कृ
ता॰स्वक्षी॰यक्षी॰साप्यदृश्यतामयासीदिति।कामपालस्ययक्षकन्यासंगमेविस्मयमानमानसो
राजहंसोरंजितमित्रंसुमित्रमाहूयतदीयभ्रातृपुत्रमर्थपालंविधायतस्मैसर्ववार्त्तादिकंव्याख्या
यासात॰ततःपरस्मिन्दिवसेवामदेवांतेवासीतदाश्रमवासीसमाराधितदेवकीर्तिकुमारमेकमवग
मय्यनरपतिमवादीत॰देवतीर्थयात्राप्रसंगेनकावेरीतीरमागतोहंविलोलालकंबालकंनिजांतस्थ

तल्लेनिधायरुदंतीं स्थविरामेकांविलोक्यावोचम॰ स्थविरेकालमयममर्भकः कस्यनयनानंदकरः कांतारं
किमर्थमागता॰ शोककारणंकिमिति॰ साकरयुगेनजलमुत्सृज्यनिजशोककथांकृत्वाटनक्षममिवमाम
वलोक्यशोकहेतुमवोचत॰ द्विजात्मजराजहंसमंत्रिणाः सितवर्मणाः कनीयानात्मजः सत्यवर्मातीर्थ
यात्राभिलाषेणादेशमेनमागच्छत॰ सकस्मिंश्चिदग्रहारेकालीनामकस्यचिद्भूसुरस्यनंदिनींविवा
ह्यतस्यामनपत्यतयागौरीनामतद्भगिनींकांचनकांतिंपरिणीयतस्यामेकंतनयमलभत॥ कालीस
सूयमेकदाधात्र्यामयासहवालमेनमेकेनमिषेणआनीयतटिन्यामेतस्यामक्षिपत॰ करेणैकेनबाल
मुद्धृत्यापरेणाप्लवमानानदीवेगागतस्यकस्यचित्तरोः शाखामवलंब्यतत्रशिशुंनिधायनदीवेगेनोह्यमा
नाकेनचित्तरुलग्नेनकालभोगिनाहमदंशि॰ मदवलंबीभूतोमहीरुहोयमस्मिन्देशेतीरमगमत॰ गरलस्यो
द्दीपनतयाममपिमृतायामरण्यपकस्त्वंनशरण्योनास्तीतिमयाशोच्यतइति॰ ततोविषमविषज्वालावली

टावयवासाधरणीतल्लेन्मयपतताद्याविष्टोहं मंत्रवलेनविषव्यवस्थामपनेतुमक्षमः समीपकुंजेषोष
धविशेषमन्विष्यप्रत्यागतोमुक्तजीवितांमवलोकयं। तदनुतस्याः पावकसंस्कारंविरच्य। शोका
कुलचेताबालमेनमगतिमादायसत्यवर्मवृत्तांतश्रवणावेलायांतन्निवासाग्रहारनामधेयस्या
श्रुततयातदन्वेषणमशक्यमित्यालोच्यभवदमात्यतनयस्यभवानेवाभिरक्षितेतिभवंतमेनम
नयमिति। तन्निशम्यसत्यवर्मस्थितेःसम्यगनिश्चिततयाखिन्नमानसोनरपतिःसुमतयेमंत्रिणेसो
मदत्तंनामतदनुजतनयमर्पितवान्। सोपिसोदरमागतमिवमन्यमानोविशेषेणपुपोष। एवंमि
लितेनकुमारमंडलेनबालकेलीरनुभवन्अधिरूढानेकवाहनोराजवाहनोनुक्रमेणचौलोप
नयनादिसंस्कारजातमलभत। ततःसकललिपिज्ञानंनिखिलदेशीयभाषापांडित्यंषडंगसहि
तवेदसमुदायकोविदत्वं। काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनै

पुराणः धर्मशास्त्रज्योतिस्तर्कमीमांसादिसमस्तशास्त्रचातुर्यंकौटिल्यकामंदकीयादिनीतिपटल
कौशलंवीणाद्यशेषवाद्यदाक्ष्यंसंगीतसाहित्यहारित्वंमणिमंत्रौषधादिमायाप्रपंचचुंचुत्वं·
मातंगतुरंगादिवाहनारोहणपाटवंविविधायुधप्रयोगचणत्वंचौर्यदुरोदरादिकपटकलाप्रौढ
त्वंचतत्तदाचार्येभ्यःसम्यक्लब्ध्वायौवनेनविलसंतंकृत्यघनलसंतंकुमारनिकरंनिरीक्ष्यमहीव
ल्लभःसोहंशत्रुजनदुर्लभइतिपरमानंदममंदमविंदत॥ ॥इतिदंडिनःकृतौदशकुमारचरिते
कुमारोत्पत्तिर्नामप्रथमःउछ्वासः॥ ॥अथैकदावामदेवःसकलकलाकुशलेनकुसुमसा
यकसंशयितसौंदर्येणकल्पितसोदर्येणसाहसापहसितकुमारेणसुकुमारेणजयध्वजातपवा
रणाकुलिशांकितकरेणकुमारनिकरेणपरिवेष्टितंराजानमानतशिरसंसमभिगम्यतेनतांकृतांप
रिचर्यामंगीकृत्यनिजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षंविदलिष्यमाणविप

क्ष्यंकुमारान्स्वयंगाढमालिंग्यमितसत्यवाक्येनविहिताशीरभ्यभाषत॰भूवल्लभभवदीयमनोरथफ
लमिवसमस्तलावण्यंतारुण्यंनुतमिदोभवत्पुत्रोनुभवति॰सहचरसमेतस्यनूनमेतस्यदिग्विज
यारंभसमयएषः॰तदस्यसकलक्लेशसहस्यराजवाहनस्यदिग्विजयप्रयाणंक्रियतामिति॰कुमा
रामाराभिरामारामाद्यपौरुषारुषाभस्मीकृतारयोरयोपहसितसमीरणारणाभियानेनयानेना
भ्युदयाशंसंराजानमकार्षुः।तत्साचिव्यमितरेषांविधायसमुचितांबुद्धिमुपदिश्यशुभेमुहूर्तेस
परिवारंकुमारंविजयायविससर्ज।राजवाहनोमंगलसूचकंशकुनंविलोकयन्देशंकंचिदति
क्रम्यविंध्याटवीमध्यमविशत्।तत्रहेतिहतिकिणांककालायसकर्कशकायंयज्ञोपवीतेनानुमे
यविप्रभावंव्यक्तकिरातप्रभावंलोचनपरुषंकमपिपुरुषंददर्श।तेनविहितपूजनोराजवाहनोभाष
त।ननुमानवजनसंगरहितेमृगहितेघोरप्रचारेकांतारेविंध्याटवीमध्येभवानेकाकीकिमितिनिव

सतिभवदंसोपनीतंयज्ञोपवीतंभूसुरभावंद्योतयति॰हेतिहतिभिःकिरातरीतिरनुमीयतेकथय
किमेतदिति॰तेजोमयोयंमानुषमात्रपौरुषोनूनंनभवतीतिमत्वासपुरुषस्तद्वयस्यमुखान्नाम
जननेविज्ञायतस्मैनिजवृत्तांतमकथयत्।राजनंदनकेचिदस्यामटव्यांवेदादिविद्याभ्यासमपहा
यनिजकुलाचारंदूरीकृत्यसत्यशौचादिधर्मव्रातंपरिहृत्यकिल्बिषमन्विष्यंतःपुलिंदपुरोगमास्त
दन्नमुपभुंजानाबहवोब्राह्मणब्रुवानिवसंति।तेषुकस्यचित्पुत्रोनिंद्याचारित्रोमातंगोनामाहं।
सहकिरातबलेनजनपदंप्रविश्यग्रामेषुधनिनःस्त्रीबालसहितानानीयबंधनेनिधायतेषांसकल
धनमपहरन्नुद्धत्यवीतदयोव्यचरं।कदाचिदेकस्मिन्कांतारेमदीयसहचरगणेनजिघांस्यमानंभूसु
रमेकमवलोक्यदयायत्तचित्तोब्रुवंननुपापाःनहंतव्योब्राह्मणइति।तेरोषारुणाननयमामांबहुधानि
रभर्त्सयन्।तेषांभाषणपारुष्यमसहिष्णुरहमवनीसुररक्षणायचिरंप्रयुध्यतैरभिहतोगतजीवि

तोऽभवं॰ततःप्रेतपुरीमुपेत्यतत्रदेहधारिभिःपुरुषैःपरिवेष्टितंसभामध्येरत्नखचितसिंहासनासीनं
शमनंविलोक्यतस्मैदंडप्रणाममकरवं॰सोपिमामवेक्ष्यचित्रगुप्तंनाममनिजामात्यमाहूय॰तमवो
चत सचिवनैषोऽमुष्यमर्त्यसमयः।निंदितचरितोप्ययंमहीसुरनिमित्तंगतजीवितोऽभूत।इ
तःप्रभृतिविगलितकल्मषस्यास्यपुण्यकर्मकरणोरुचिरुदेष्यति।पापिष्ठैरनुभूयमानमत्रयात
नाविशेषंविलोक्यपुनरपिपूर्वशरीरमनेनगम्यतामिति चित्रगुप्तोपितत्रतत्रसंतप्तेष्वायसस्तंभे
षुबध्यमानानत्युष्णीकृतेविततशरावतैलेनिक्षिप्यमाणान्नूलगुडैर्जर्जरीकृतावयवान्निशि
तटंकैःपरितक्ष्यमाणानपिदर्शयित्वापुण्यबुद्धिमुपदिश्यमाममुंचत।ततदेवपूर्वशरीरमहंप्राप्तो
महाटवीमध्येशीतलोपचारैरुपचर्यतामहीसुरेणापरीक्ष्यमाणःशिलायांशायितःक्षणमतिष्ठम
।तदनुविदितोदंतोमदीयवंशवंधुगणाःसहसासमागत्यमंदिरमानीयमामपक्रांतव्रणमकरो

त॰ द्विजन्मा कृतजन्मोमत्यमक्षरशिक्षां विधाय विविधागमतंत्रमाख्याय कल्मषक्षयकारणां सदाचारमु
पदिश्य पत्नानेक्षणगम्यमानस्य शशिखंडशेखरस्य पूजाविधानमभिधाय पूजामत्कृतामंगीकृत्य
निरगात। तदारभ्याहं किरातकृतसंसर्गं वंधुकुलवर्गमुत्सृज्य सकललोकैकगुरुमिंदुकलावतंसं
चेतसि स्मरन्नस्मिन्नकानने हरी कृतकलंको वसामि। देव भवते विज्ञापनीयं रहस्यं किंचिदस्त्यागम्य
तामिति। स वयस्यगणाद् गोपनीयं रहसि पुनरेनम्भाषत। राजन्नतीते निशांते गौरीपतिः स्वप्ने संनिहितो
निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकांतिः प्रश्रयानतं मामवोचत्। मातंगदंडकारण्यांतरालगामि
न्यास्तटिन्यास्तीरभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिंगस्य पश्चाद्द्विपतिकन्यापदं यत्किंचिन्हि
तस्यान्नमनः सविधे विधेराननमिव किमपि विलं विद्यते तत्रैदेवस्मिंन्नताम्रशासनं विधातुरिव समादाय
विधितदुपदिष्टं दिष्टविजयमिव विधाय पातालोकाधीश्वरो भवता भवितव्यं भवत्साहाय्यकरो

राजकुमारोध्रुवोवासमागमिष्यतीतितदादेशानुगुणमेवभवदागमनमनूतासाधनाभिलाषिणो
ममतोषिणोरचयसाहाय्यमितितथेतिराजवाहनःसाकंमातंगेनसतांनमितोत्तमांगेनविहाया
र्द्धरात्रेनिद्रापरतंत्रंमित्रगणांवनांतरमवापातदनुतदनुचराःकल्यसाकल्येनराजकुमारमनवलोक
यतोविषसमहृदयास्तेषुवनेषुसम्यगन्विष्यानवेक्षमाणाएतदन्वेषणमनीषयादेशांतरंचरि
ष्णवोतिसहिष्णवोनिश्चितपुनःसंगमसंकेतस्थानाःपरस्परंवियुज्यययुः।लोकैकवीरेणकुमारे
णारक्ष्यमाणाःसंतुष्टांतरंगोमतंगोपिबिलंशशिशेखरकथिताभिज्ञानपरिज्ञातंनिःशंकंप्रविश्यप्रगृ
हीतताम्रशासनोरसातलेयथातेनैवोपेत्यतत्रकस्यचित्पत्तनस्यनिकटकेलीकाननकासारस्य
विततसारसस्यसमीपेनानाविधेनशासनविधानोपपादितेनहविषाहोमंविरच्यप्रत्यूहपरि
हारिणीसविस्मयंविलोकयतिराजवाहनेसमिदाज्यसमुज्ज्वलितेज्वलनेपुरापगेहंदेहंमंत्रपू

र्वकमाहूतीकृत्यतडित्समानकांतिंदिव्यांतनुमलभत।तदनुमणिमयमंडनमंडलमंडितासक
लललनाकुलललामभूताकन्यकाकाचनविनीतानेकसखीजनानुगम्यमानाकलहंसगसाश्च
नैरागत्यावनिसुरोत्तमायमणिमेकमुज्ज्वलाकारमुपायनीकृत्यतेनकालमितिपृष्टासोत्कंठा
कलकंठस्वनेनमंदमंदमुदंजलिरभाषत।भूस्करोत्तमाहमसुरोत्तमनंदिनीकालिंदीनाममम
पितास्यलोकस्यशासितामहानुभावोनिजपराक्रमासहिष्णुनाविष्णुनादूरीकृतामरेसमरेयम
नगरातिथिरकारि।तद्वियोगशोकसागरमग्नांमामवेक्ष्यकोपिकारुणिकःसिद्धतापसोभाषत।बाले
कश्चिद्दिव्यदेहधारीमानवोनवोवल्लभस्तवभूत्वासकलंरसातलंपालयिष्यतीति।तदादेशान्निश्चा
म्यघनशब्दोन्मुखीचातकीववर्षागमनमिवतवालोकनकांक्षिणीचिरमतिष्ठम्।मन्मनोरथफलाय
मानभवदागमनमवगम्यमदृशावलंवनभूतामात्यानुमत्यामदनानुकृतसारथ्येनमनसाभवंत

मागच्छं।लोकस्यास्यराज्यलक्ष्मीमंगीकृत्यमांतत्सपत्नीकरोतुभवानिति।मातंगोपिराजवाहनानु
मत्यातांतरुणींपरिणीयदिव्यांगनालाभेनहृष्टतरोरसातलराज्यंपुरीकृत्यपरमानंदमाससाद
वंचयित्वावयस्यगणांसमागतोराजवाहनस्तदवलोकनकौतूहलेनभुवंगमिष्णुःकालिंदीद
त्तंक्षुत्पिपासादिक्लेशनाशनंमणिंसाहाय्यकरणसंतुष्टान्मातंगाल्लब्ध्वाकंचनाध्वानमनुव
र्तमानंतंविसृज्यबिलपथेनतेननिर्ययौ।तत्रचमित्रगणमनवलोक्यभुवंबभ्राम।भ्रमंश्चविशा
लोपशल्येकमप्याक्रीडमासाद्यतत्रविश्रमिषुरांदोलिकारूढंरमणीसहितमाप्तजनपरिवृतमुद्या
नेसमागतमेकंपुरुषमपश्यत्।सोपिपरमानंदेनपल्लवितचेताविकसितनारविंदोममस्वामीसो
मकुलावतंसोविशुद्धयशोनिधीराजवाहनएषमहाभाग्यतयाकांडरावास्यपादमूलंगतवानस्मि
संप्रतिमहान्नयनोत्सवोजातइतिससंभ्रममांदोलिकायाअवतीर्यसरभसपदविन्यासविलासिह

द०.प०.
२५
15

षौत्कर्षंचरितःत्रिचतुरपदान्युद्गतस्यचरणकमलयुगलंगलदुल्लसन्मल्लिकावलयेनमौलिनायस्प
र्शःप्रेमार्द्राश्रुपूर्णोराजापुलकितांगंतंगाढमालिंग्यायेसौम्यसोमदत्तइतिव्याजहार।ततःकस्यापि
पुंनागभूरुहस्यछायाशीतलेतलेसंविष्टेनमनुजनाथेनसप्रणयमभाणि।सखेकालमेतावंतंदे
शेकस्मिन्प्रकारेणाकेनाप्यायिभवतासंप्रतिकुत्रगम्यते।तरुणीकेयमेषपरिजनःसंपादितःकथं
कथयेति।सोपिमित्रसंदर्शनव्यतिकरापगतचिंताज्वरशतिरायोमुकुलितकरकमलःसविनयमात्मीय
प्रचारप्रकारमवोचत्॥इतिदंडिनःकृतौदशकुमारचरितेद्विजोपकृतिर्नामद्वितीयउछ्वासः॥ ॥
देवभवच्चरणकमलसेवाभिलाषीभूतोहंभ्रमन्नेकस्यांवनावनौपिपासाकुलोलोलतापरिहृतशीत
लंनदसलिलंपिबनुज्ज्वलाकारंरत्नंतत्रैकमद्राक्षं।तदादायगत्वाकंचनाध्वानमंबरमणेरत्युष्णत
यागंतुमक्षमोवनेस्मिन्नेवकिमपिदेवतायतनंप्रविष्टोदीनाननंबहुतनयसमेतंस्थविरंमहीसुरमे

दम·
२५

कमवलोक्यकुशलमुदितद्योहमपृच्छं॰कार्यस्यापविवरणंवदनोमहदाश्चर्यमानसोवोचदयञ्जन्मा

।महाभागसुतानेतान्मातृहीनाननेकैरुपायैरक्षन्निदानीमस्मिन्कुदेशेभैक्ष्यंसंपाद्यददंदेतेभ्यो

वसामिशिवालयेस्मिन्निति।अद्देवएतत्कटकाधिपतीराजाकस्यदेशस्यकिंनामधेयःकिमत्रागमन

कारणमस्येतिपृष्टोभाषतमहीसुरः।सोमप्रभनामकालेनामलाटेश्वरोदेशस्यास्यपालयितुर्वीरकेतो

स्तनयांवामलोचनांनामतरुणीरत्नमसमानलावण्यांपश्यावंश्यावमवश्यंतदुहितृप्रार्थनस्यतस्यनग

रीमरौत्सीत्।वीरकेतुरपिभीतोमहदुपायनमिवतनयांमत्तकालायादात्।तरुणीलाभहृष्टचेतालाट

पतिःपरिणीयानिजपुरएवेतिनिश्चित्यागच्छन्निजदेशंप्रतिसंप्रतिमृगयादरेणात्रवनेसैन्यवासमकार

यत्।कस्मात्सारेणानियुक्तोमानपालोनामवीरकेतुमंत्रीमानधनश्चतुरंगवलसमन्वितोन्यत्ररचिततिरि

विरस्तत्रिजनाथावमानखिन्नमानसोन्तर्विभेदेति।विप्रासोवकृतनयोविद्वान्निर्धनःस्फविरश्चदानयोग्य

द॰कु॰
१६
16

इति तस्मै करुणापूर्णमना रत्नमदां। परमाल्हादविकसिताननोभिहितानेकाशीः कुत्रचिदस्य जन्मा जगा
म। अश्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखं। ततस्तु पश्चान्निगलितबाहुयुगलः सभूसुरः कशा
घातचिन्हितगात्रोनेकैर्नैस्त्रिंशिकानुयातोभ्येत्य मामसौ दस्युरित्यदर्शयत्। परित्यक्तभूसुरा राजभटा
रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारमेते तव सखाय
इति निगडितान्कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगमकार्षुः। किंकर्तव्यतामूढेन निराश्र
क्लेशानुभवेनावाचि मया। ननु पुरुषा वीर्यपरुषा निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरं यू
यं वयस्या इति निर्दिष्टमेतैः किमिदमिति। तथाविधं मामवेक्ष्य भूसुरान्मया श्रुतं लाटपतिवृत्तान्तं व्या
ख्याय चोरवीराः पुनरवोचन्। महाभाग वीरकेतुमंत्रिणो मानपालस्य किंकरा वयं तदाज्ञया लाटेश्वरमा
रणाय रात्रौ सुरुंगाद्वारेण तदगारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमपहृत्य महाटवीं प्राविशा

रा॰म॰
१६

म। अपरेद्युश्च यदन्वेषिणो राजानुचरा बहवोभ्येत्य धृतधनचयान् अस्मान् परितः परिवृत्य दृढतरं बध्वा नि
कटमानीय समस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्धायमाणिक्यादानायास्मान् कि
लाश्रं खलयन्निति। श्रुतरत्नरत्नालोकनस्थानो हमिदं तदेव माणिक्यमिति निश्चित्य भद्र देवदाननिमित्तं
दुरवस्थामात्मनो जन्मनामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्ष
। ततोर्द्धरात्रे तेषां मम च शृंखलाबंधनं निर्भिद्य तैरनुगम्यमानो निद्रितस्य द्वाःस्थगणस्यायुधजातमादाय
पुररक्षासुरतोभिमुखागतान् पटुपराक्रमलीलयाभिद्राव्यमानपालशिबिरं प्राविशाम। मानपालो नि
जकिंकरेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत्। परेद्युर्मत्तकालेन प्रेषि
ताः केचन पुरुषाः मानपालमुपेत्य मंत्रिन् मदीयराजमंदिरे सुरुंगया बहुधनमपहृत्य चोरा वीरा भवदीयं
कटकं प्राविशन् तानर्पय नो चेन्महाननर्थः संभविष्यतीति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य परोषारुणितने

त्रोमंत्रीलाटयतिःकस्तेनमैत्रीकापुनरस्यवराकस्यसेवयाकिंलभ्यमितितान्विरमत्स्मयतातेमानपालेनोक्तं
विप्रलापमत्तकालायतस्थैवाकथयन्।कुपितोपिलाटपतिर्दोर्वीर्यगर्वेणाल्पसैनिकसमेतोयोद्धुमभ्यगा
त्।पूर्वमेवकृततरसानिश्चयोमानीमानपालःसन्नद्धयोधोयुद्धकामोम्लानिःशंकंनिरगात्।अहमपि
सबहुमानंमंत्रिदत्तानिबहुलतुरंगमोपेतंचतुरसारथिंरथंचदृढतरंकवचंमदनुरूपंचापंचविविध
बाणापूर्णतूणीरद्वयंसमुचितान्यायुधानिगृहीत्वायुद्धसंनद्धोमदीयबलविश्वासेनरिपूद्धरणोद्य
क्तंमंत्रिणमन्वगामं।परस्परमत्सरात्तुमुलसंगरंकुर्वदुभयसैन्यमतिक्रम्यसमुल्लसद्भुजाटोपेनबाण
वर्षतदंगंविमुंचन्नरातीन्प्राहरं।ततोतिरयतुरंगममद्रथंतन्निकटंनीत्वाशीघ्रलंघनोपेततदीयरथोह
मरातेःशिरःकर्तनमकार्षं।तस्मिन्पतितेतदावसिष्टसैनिकेषुपलायितेषुनानाविधहयगजादिवस्तु
जातमादायपरमानंदसंनतोमंत्रीममानेकविधांसंभावनामकार्षीत्।मानपालप्रेषितात्तदनुचरात्

नमखिलमुदंतमाकर्ण्य संतुष्टमना राजाभ्युपगतो मदीयपराक्रमे विस्मयमानः समहोत्सवममात्यबां
धवानुमत्या शुभदिने निजतनयां मह्यमदात्। ततो यौवराज्याभिषिक्तोऽहमनुदिनमाराधितमहीपा
लचित्तो वामलोचनयानया सह नानाविधं सौख्यमनुभवन्नभवद्विरहवेदनाशल्यवैकल्यहृदयः सि
द्धादेशेन सुहृज्जनावलोकनफलप्रदेशं महाकालनिवासिनः परमेश्वरस्याराधनायाद्य यत्नेन स
मेतः समागतोऽस्मि। भक्तवत्सलस्य गौरीपतेः कारुण्येन भवत्पदारविंदसंदर्शनानंदसंदोहो मयाल्ल
ब्ध इति। तन्निशम्याभिनंदितपराक्रमो राजवाहनस्तं निरपराधदंडे दैवमनुपालभ्य तस्मै क्रमेणात्मच
रितं कथयामास। तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृष्टचरणां
गुलिमुद्दंडांजलिममुं गाढमालिंग्यानंदबाष्पसंकुलसंफुल्ललोचनः सौम्य सोमदत्तायं स पुष्पोद्भव इ
ति तस्मै तं दर्शयामास। तौ च चिरविरहदुःखं विसृज्यान्योन्यालिंगनसुखमन्वभूतां। ततस्तस्यैव महीरुह

द॰ पु॰
१८
18

स्वच्छायायामुपविष्टं राजानं समभाषत। वयस्य मत्स्वकार्यं करिष्णुरहं मित्रगणो विदितार्थः सर्वथान्तरा
यं करिष्यतीति निद्रितान्भवतः परित्यज्य निरगां। तदनुप्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेष
णाय कुत्र गतवान्। भवानेकाकी क्व गत इति। सोपि ललाटतटचुम्बदंजलिपुटः सविनयं समलपत्॥ ॥
॥इति दंडिनः कृतौ दशकुमारचरिते सोमदत्तचरितं नाम तृतीय उछ्वासः॥ ॥देव महीसुरोपकारायै
व देवो गतवानिति निश्चित्यापि देवेन गंतव्यं देशं निश्चेतुमशक्नुवानो मित्रगणः परस्परं वियुज्य दिक्षु
देवमन्वेष्टुमगच्छत्। अहमपि देवस्यान्वेषणाय महीमटन्कदाचिदंबरमध्यगतस्यांबरमणेः किरण
मसहिष्णुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशं। मम पुरोभागे दिनमध्यसंकु
चितसर्वावयवां कूर्माकृतिं मानुषछायां निरीक्ष्योन्मुखो गगनतलान्महारयेण पतंतं पुरुषं कंचिदंतरा
ल एव दयायमानहृदयोहमवलंब्य शनैरवनितले निक्षिप्य दूरपातवीतसंज्ञं तं शिशिरोपचारेण विबो

एम॰
१८

ध्यच्छोकातिरेकेणोऽन्नतबाष्पलोचनं तं भ्रगुपतनकारणमपृच्छं।सोऽपि करतहैरश्रुकणानपनयन्नभा
षत।सौम्यमगधाधिनाथामात्यस्यपद्मोद्भवस्यात्मसंभवोरत्नोद्भवनामाहं।वाणिज्यरूपेणकालय
वनद्वीपमुपेत्यकामपिवणिकूकन्यकांपरिणीयतयासहप्रत्यागच्छन्नंबुधौतीरस्यानतिदूरएव
प्रवहणस्यभग्नतयासर्वेषुनिमग्नेषुकथंकथमपिदैवानुकूल्येनतीरभूमिमभिगम्यनिजांग
नावियोगदुःखार्णवेप्लवमानःकस्यापिसिद्धतापसस्यादेशादरेणषोडशहायनानिकथंचिन्नी
त्वादुःखस्यपारमनवेक्षमाणोगिरिपतनमकार्षमिति।तस्मिन्नेवावसरेकिमपिनारीकूजितम
श्रावि।नखलुसमुचितमिदंयत्सिद्धादिष्टपतितनयमिलनेविरहमसहिष्णुर्वैश्वानरंविशसी
ति।तन्निशम्यमनोविदितजनकभावंतमवादिषम्॥तातभवतेविज्ञापनीयानिबहूनिसंति।भ
वतुपश्चादखिलमाख्यातव्यं।अधुनानारीकूजितमनुपेक्षणीयंमया।क्षणमात्रमत्रभवतास्थी

यतामितिातदनुसोहंत्वरयाकिंचिदंतरमगमं।तत्रपुरतोभयंकरज्वालाकुलहुतभुगवगाहनसा
हसिकांमुकुलितांजलिपुटांवनितांकाचिदवलोक्यससंभ्रममनलादपनीयकृजंस्याववृयास
हमत्पितुरभ्यर्णमभिगमय्यसस्थविराभवोचम्।वद्धेभवत्याकुत्रत्यकांतारेनिमित्तेनकेनदुखस्या
नुभूयतेकथ्यतामिति।सासगद्गदमवादीत्त पुत्रकालयवनद्वीपेकालगुप्तनाम्नोवणिजःकस्य
चिद्दुहिताऽस्मिसुवृत्तानामरत्नोद्भवेननिजकांतेनागछंतीजलधौमग्नेप्रवहणेनिजधात्र्यामयासह
फलकमेकमवलंब्यदैवयोगेनकूलमुपेता।आसन्नप्रसवसमयाकस्यांचिदटव्यामात्मजमसूत।
ममतुमंदभाग्यतयाबालेवनमातंगेनगृहीतेमद्द्वितीयापरिभ्रमंतीषोडशवर्षानंतरंभर्तृपुत्रसं
गमोभविष्यतीतिसिद्धवाक्यविश्वासादेकस्मिन्पुण्याश्रमेएतावंतंसमयंनीत्वाशोकमपारंसोढु
मक्षमासमुज्वलितेवैश्वानरेशरीरमाहुतीकर्तुमुद्युक्तासीदिति।तदाकर्ण्यनिजजननींज्ञात्वाता

महं दंडवत्प्रणम्यतस्यैमद्वृत्तमखिलमाख्यायधात्रीभाषराप्रफुल्लवदनं विस्मयविकसिताक्षं जनक
मदर्शयं। पितरौ तौ साभिज्ञानमन्योन्यं ज्ञात्वामुदितांतरात्मानौ विनीतं मामानंदाश्रुवर्षेणाभिषिच्य
गाढमाश्लिष्यशिरस्युपाघ्रायकस्याश्चिन्महीरुहच्छायायामुपाविशताम्।कथं निवसतिमहीवल्ल
भोराजहंसइतिजनकेनपृष्टोहंतस्यराज्यच्युतिंत्वदीयजननं सकलकुमारावाप्तिं तवदिग्विजयारं
भंभवतोमातंगानुयानमस्माकंयुष्मदन्वेषणाकारणं सकलमभ्यधां। ततस्तौ कस्यचिदाश्रमेमुनेरस्था
पयम्। ततोदेवस्यान्वेषणपरायणोहमखिलकार्यनिमित्तं वित्तंनिश्चित्यभवदनुग्रहाल्लब्धस्यसा
धकत्वस्यसाहाय्यकरणदक्षंशिष्यगणंनिष्पाद्यविंध्यवनमध्येपुरातनपट्टनस्थानान्युपेत्यवि
विधनिधिसूचकानांमहीरुहाणामधोनिक्षिप्तान्वसुपूर्णान्कलशान्सिद्धांजनेनज्ञात्वारक्षिषुपरि
तःस्थितेषुखननैःसाधनैरुत्पाद्यदीनारानसंख्यान्राशीकृत्यतत्कालागतमनतिदूरेनिवेशितवणि

क्रटकंकंचिदभ्येत्यतत्रबलिनोबलीवर्द्धान्गोणीश्चक्रत्वान्यद्रव्यमिषेणवसुतऊगोणीःसंचिंतैरूत्य
मानेत्रानकैःकटकमनयं।तदधिकारिणाचंद्रपालेनकेनचिद्वणिक्पुत्रेणविरचितसौहृदोहमनुनै
वसाकमुज्जयिनीमुपाविशं।मत्पितरावपितांपुरीमभिगमय्यसकलगुणनिलयेनबंधुपालना
म्नाचंद्रपालजनकेननीयमानोमालवनाथदर्शनंविधायतदनुमत्यागूढवसतिमकरवं।ततःका
ननभूमिषुभवंतमन्वेष्टुमुद्युक्तंमांपरममित्रंबंधुपालोनिशम्यावदत्।सकलंधरणीतलमपारम
न्वेष्टुमक्षमोभवान्मनोग्लानिंविहायतूष्णींतिष्ठतु।भवन्नायकालोकनकारणंशुभशकुनंनिरीक्ष्य
कथयिष्यामीतितेनाश्वासितहृदयोहमनुदिनंतदुपकंठवर्त्तीकदाचिदिंदुमुखींनवयौव
नावलीढावयवांनयनचंद्रिकांबालचंद्रिकांनामतरुणीरत्नंवणिक्मंदिरलक्ष्मींमूर्त्तामिवावलोक्य
तदीयलावण्यावधूतधीरभावोलतांतबाणबाणलक्ष्यतामयासिषम्।चकितबालकुरंगलोचना

सायिकुसुमसायकसायकायमानेनकटाक्षवीक्षणेनमामसकृन्निरीक्ष्यमंदमारुतांदोलिता
लतेवाकंपतमनसाभिमुखैःसमाकुंचितैरागलज्जांतरालवर्तिभिःसांगवर्तिभिरीक्षणविशेषैर्नि
जमनोवृत्तिमकथयत।चतुरगूढचेष्टाभिरस्यामनोनुरागंसम्यक्ज्ञात्वासुखसंगमोपायमचिंत
यमअन्यदाबंधुपालःशकुनैर्भवद्गतिंप्रेक्षिष्यमाणःपुरोपांतविहारवनंमयासहोपेत्यकस्मिं
श्चिन्महीरुहेशकुंतवचनानिशृण्वन्नतिष्ठत।अहमुत्कलिकाविनोदपरायणोवनांतरेपरिभ्रम
न्सरोवरतीरेचिंताक्रांतचित्तांदीनवदनांमन्मनोरथैकभूमिंबालचंद्रिकांव्यलोकयं।तस्याससंभ्र
मप्रेमलज्जाकौतुकमनोरमंलीलाविलोकनसुखमनुभवन्सुदत्यावदनारविंदेविषण्णभावं
मदनकदनखेदानुभूतंज्ञात्वातन्निमित्तंज्ञास्यन्लीलयातदुपकंठमुपेत्यावोचिषम्।सुमुखितवमु
खारविंदस्यदैन्यकारणंकथयेति।सारहस्यसंजातविश्रंभतयाविहायलज्जाभयेशनैरभाषत।सो

ध्यमानसारोमालवाधीश्वरोवार्धकस्यप्रबलतयानिजनंदनंदर्पसारमुज्जयिन्यामभ्यषिंचत।सकुमा
रःसप्तसागरपर्यंतमहीमंडलंपालयिष्यन्निजयेत्तघस्त्रेया।वुदंडकर्माणौचंडवर्मदारुवर्माणौध
रणीभरणेनियुज्यतपश्चरणायराजराजगिरिमभ्यगात।राज्यंसर्वमसपत्नंशासतिचंडवर्मणिदा
रुवर्मामातुलाग्रजन्मनोःशासनमतिक्रम्यपारदार्यपरद्रव्यापहरणादिदुष्कर्मकुर्वाणोमन्मथ
समानस्यभवतोलावण्यायत्तचित्तामिमामेकदाविलोक्यकन्यादूषणदोषंदूरीकृत्यबलात्कारेण
रंतुमुद्युंक्ते।तच्चिंतयादैन्यमगच्छमिति।तस्यामनोगतंमयिरागोद्रेकंमन्मथमनोरथसिद्ध्यंतरायंचनि
शम्यबाष्पपूर्णलोचनामाश्वास्यदारुवर्म्मणोमारणोपायंचविचार्यवल्लभामवोचं।तरुणिभवदभिला
षिणंदुष्टहृदयमेनंनिहंतुमुपायःकश्चिन्मयाचिंत्यते।यक्षःकश्चिदधिष्ठायबालचंद्रिकांनिवस
तितदाकारसंपदाश्चर्यखलितहृदयोयःसंबंधयोग्यःसाहसिकोरतिमंदिरेतंयक्षंनिर्जित्यतयैक

सखीसमेतयामृगाक्ष्यासंलापामृतस्फारसमनुभूयत्कुशलीनिर्गमिष्यतितेनचक्रवाकसंज्ञाया
कारपयोधराविवाहनीयेतिसिद्धेनैकेनावादीतिपुरस्तनस्यपुरतोभवदीयैःसत्यवाक्यैर्ज
नैरसकृत्कथनीयम्।तदनुदारुवर्मावाक्यानीत्थंविधानिश्राव्यश्रावंवल्लभैर्नीयदिभियास्थास्यति
तर्हिवरंयदिवादैर्जन्येनत्वयासंगममंगीकरिष्यतितदासभवदीयैरित्थंवाच्यः।सौम्यदर्यसारख
स्कधाधिपामात्यस्यभवतोस्मन्निवासेसाहसकरणमनुचितयोरजनसाक्षिकंभवन्मंदिरमानी
तयातयातोयज्ञाक्ष्यासहक्रीडन्नायुष्मान्यदिभविष्यसितदापरिणीयतरुणीमनोरथान्निर्वि
शेति।सोप्येतदंगीकरिष्यति।त्वंसखीवेषधारिणामयासहतस्यमंदिरंगच्छ।अहमेकांतनि
केतनेमुष्टिजानुपादाघातैस्तंरभसान्निहत्यपुनरपिवयस्यामिषेणभवतीमनुनिःशंकंनिर्गमिष्या
मि।तदेनमुपायमंगीकृत्यविगतसाध्वसलज्जाभवज्जनकजननीसहोदराणांपुरतआवयोःप्र

मातिशयमामाख्याय सर्वथास्मत्परिणायकरणे ताननुनयेः। तेपि वंशसंपल्लाव्याय यूने मह्यं वां
दास्यंत्येव दारुवर्मणो मारणोपायं तेभ्यः कथयित्वा तेषामुत्तरमाख्येयं मह्यमिति। सापि किंचिदुत्फु
ल्लसरसिजानना मामब्रवीत्। सुभग क्रूरकर्माणं दारुवर्माणं भवानेव हंतुमर्हति। तस्मिन्हते स
र्वथा युष्मन्मनोरथः फलिष्यति। एवं क्रियतां भवदुक्तं सर्वमहमपि तथा करिष्य इति मामसकृत्प्र
सन्नवदना विलोकयंती मंदंमंदमगारमगात्। अहमपि बंधुपालमुपेत्य शकुनज्ञात्तस्मात्त्रिंश
द्दिवसानंतरमेव भवत्संगः संभविष्यतीत्यशृणवं। तदनु मदनुगम्यमानो बंधुपालो निजावासं प्र
विवेश मामपि निलयाय विससर्ज। मन्मायोपायवागुरापाशलग्नेन दारुवर्मणा रतिमंदिरे रंतुं समा
हूता बालचंद्रिका तं गमिष्यतीदूतिकां मन्निकटमभिप्रेषितवती। अहमपि मणिनूपुरमेखलाकं
कणकटकताटंकहारक्षौमकज्जलं वनितायोग्यं मंडनजातं निपुणतया तत्तत्स्थानेषु निक्षिप्य सम्य

गंगीकृतमनोज्ञवेषोवल्लभयासहतदागारद्वारोपांतमगछंद्वाःस्थकथितास्मदागमनेनसाद

रंविहिताभ्युत्थानातेनद्वारोपांतनिवारिताशेषपरिवारेणामदन्विताबालचंद्रिकासंकेतागारमनी

यत।नगरव्याकुलायक्षकथापरीक्षन्नागरिकजनोपिकुतूहलेनदारुवर्मणःप्रतीहारभूमिमग

मत।विवेकशून्यमतिरसौरागातिरेकेणरत्नखचितहेमपर्यंकेहंसतूलगर्भशयनमानीयतरुणी

तस्यैमत्स्यघातमिस्त्रासम्यगनवलोकितपुंभावायमनोरमस्त्रीवेषायचचामीकरमणिमयमंडनानि

सूक्ष्माणिचित्रवस्त्राणिकस्तूरिकामिलितंहरिचंदनंकर्पूरसहितंतांबूलंसुरभीणिकुसुममाललि

तंवस्तुजातंसमर्प्यमुहूर्तद्वयमात्रंहासवचनैःसंलपन्नतिष्ठत्।ततोरागांधतयासमुखीकचग्रहणे

मतिव्यधत्ता।रोषारुणितोहमेनंपर्यंकतलान्निःशंकोनिपात्यमुष्टिजानुपादाघातैःप्राहरम्।नियुद्ध

रभसविकलमलंकारंएवंवपुरुन्मीलयिलाभयकंपितानतांगीमुपलालयन्मंदिरांगणमुपेतसा

द॰पू॰
२३
23

ध्वसं कथयित इवोच्चैरकूजत्। हा बालचंद्रिकाधिष्ठितेन घोराकारेण यक्षेण दारुवर्मा निहन्यते। सहसास
मागच्छत पश्यतेमिति। तदाकर्ण्य मिलिता जनाः समुद्यद्बाष्पा हाहानिनादेन दिशो बधिरयंतो बालचंद्रिका
मधिष्ठितं यक्षं बलवंतं मन्यमाना अपि दारुवर्मामंदिरं ध्वस्तामेवायान्तः तत्तदसौ स्वकीयेन कर्मणाभिहतः किं
तस्य विलापेनेति मिथ्यालपंतः प्राविशन्। कोलाहले तस्मिन् चटुललोचनया सह नैपुण्येन सहसा नि
र्गतो निजावासमगां। ततो गतेषु कतिपयदिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिंदु
मुखीं पूर्वसंकल्पितान् स्मरतविशेषान् यथेष्टमन्वभवं बंधुपालशकुननिर्दिष्टे दिवसेऽस्मिन् निर्गत्य
पुराद्वर्तमानो नेत्रोत्सवकारि भवदवलोकनसुखमनुभवामीति। एवं मित्रवृत्तांतं निशम्याम्लानमा
नसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तांतं तस्मै निवेद्य सोमदत्तं महाकालेश्वराराधनानंतरं भ
वद्वल्लभां सपरिवारां निजकटकं प्रापय्यागच्छेति नियुज्य पुष्पोद्भवेन सेव्यमानो भूस्वर्गायमानमवंति

राम॰
२३

कापुरंविवेश।तत्रायंमस्वामिकुमारइतिबंधुपालादयेबंधुजनायकथयित्वातेनराजवाहनेनबहुवि
धांसपर्यांकारयन्सकलकलाकुशलोमहीसुरइतिपुरिप्रकटयन्पुष्पोद्भवोमुष्यराज्ञोमज्ज
नभोजनादिकमनुदिनंस्वमंदिरेकारयामास॥ ॥छ॥ ॥अथमीनकेतनसेनानायकेनमलयगिरिम
हीरुहनिरंतरावासिभुजंगमभुक्तावशिष्टेनेवसूक्ष्मतरेणाघ्रातहरिचंदनपरिमलभरेणेवमंदगति
नादक्षिणानिलेनवियोगिहृदयस्थंमन्मथानलमुज्ज्वलयन्सहकारकिसलयमकरंदास्वादन
रक्तकंठानांमधुकरकलकंठानांकाकलीकलकलेनदिक्चक्रंवाचालयन्मानिनीमानसोत्कलि
कामुजनयन्माकंदसिंदुवाररक्ताशोककिंशुकतिलकेषुकलिकामुपपादयन्मदनमहोत्सवा
यरसिकमनांसिसमुल्लासयन्वसंतसमयःसमाजगाम।तस्मिन्नतिरमणीयकालेवंतिसुंदरीनाममा
नसारनंदिनीप्रियवयस्ययाबालचंद्रिकयासहनगरोपांतरम्योद्यानेविहारोत्कंठयायोरसुंदरी

समवायसमन्विताकस्यचिच्चूतपोतकस्यच्छायाशीतलेसैकततलेगंधकुसुमहरिद्राक्षतचीनांबरादिना
नानाविधेनपरिमलद्रव्यनिकरेणमनोभवमर्चयंतीरेमे॰तत्ररतिप्रतिकृतिमवंतिसुंदरींद्रष्टुकामःकामद्
ववसंतसहायःपुष्पोद्भवसमन्वितोराजवाहनस्तदुपवनंप्रविश्यतत्रतत्रमलयमारुतांदोलितशाखानि
रंतरसमुद्भिन्नकिसलयकुसुमफलसमुल्लासितेषुरसालतरुषुकोकिलकुलकीरालिमधुकराणामाला
पानश्राव्यश्रावंविकसदिंदीवरकह्लारकैरवराजीवराजिकेलिलोलकलहंससारसकारंडवचक्रवाकच
क्रवालकलरवव्याकुलविमलशीतलसलिलललितानिसरांसिदर्शंदर्शमभंदलीलयाललनासमीपम
वापबालचंद्रिकयानिःशंकमितआगम्यतामितिहस्तसंज्ञयासमाहूतोनिजतेजोनिर्जितपुरुहूतोराजवाहनः
कृशोदर्यीअवंतिसुंदर्योअंतिकंसमाजगाम॰यावसंतसहायेनसमुत्सुकतयारतेःकेलीशालभंजिकावि
धित्सयाकंचननारीविशेषंविरच्यात्मनःक्रीडाकासारशारदारविंदसौंदर्येणयादृदयमुद्यानवनदीर्घिका

मत्तमरालिकागमनरीत्यालीलालसगततिविलासंहृणीरलावण्येनजंघेलीलामंदिरद्वारकदली
लालित्येनमनोज्ञमुरुयुगंजैत्ररथचातुर्येणघनंजघनंकिंचिद्धिकसल्लीलावतंसकह्लारकोरकको
टरानुवृत्यागंगावर्तसनाभिनाभिसोपारोहणपरिपाद्यावलित्रयंमोर्वीमधुकरपंक्तिनीलिमली
लयारोमावलिपूर्णस्वर्णकलशशोभयाकुचद्वंद्वंलतामंडपसौकुमार्येणबाहू•जयशंखाभि
ख्याभिख्ययाकंठ•कामिनीकर्णपूरसहकारपल्लवरागेणप्रतिबिंबीकृतबिंबरदनछदं•बाणाय
मानपुष्पलावण्येनशुचिस्मितं•अग्रहूतिकाकलकंठिकाकलालापमाधुर्येणवचनजातंसकल
सैनिकनाथकमलयमारुतसौरभ्येणनिःश्वासपवनंजयद्धजमीनदर्पेणलोचनयुगलंचापयष्टिश्रि
याभ्रूलतेप्रथमसकृद्दःस्वाकरस्यापनीतकलंकयाकांत्यावदनंलीलामयूरबर्हभंग्याकेशपाशंचवि
धायसमस्तमकरंदकस्तूरिकासंमितेनमलयजरसेनप्रक्षाल्यकर्पूरपरागेणसंमृज्यनिर्मितेवरराजसा

द०कू०
२५
25

मूर्त्तिमतीवलक्ष्मीर्मालवेन्द्रकन्यकास्वेनैवाराध्यमानंसंकल्पितवरप्रदानायाविर्भूतंमूर्त्तिमंतंमन्म
थमिवतमालोक्यमंदमारुतांदोलितालतेवमदनावेशवतीचकंपेतदनुक्रीडाविश्रंभान्निवृत्ताल
ज्जयाकानिकान्यपिभावांतराणिव्यधत्त॰ललनाजनंसृजताविधात्रानूनमेषाघुणाक्षरन्यायेन
निर्मितानोचेदब्जभवेएवंविधनिर्माणनिपुणायदिस्यात्तर्हितत्समानलावण्यामन्यांतरुणींकिंन
करोतीतिसविस्मयानुरागंविलोकयतस्तस्यसमक्षस्थातुंलज्जितासतीकिंचित्सखीजनांतरितगा
त्रातन्नयनाभिमुखैःकिंचिदाकुंचितैरचितभ्रूलतैरपांगवीक्षितैरात्मनःकुरंगस्थानीयमानलाव
ण्यंराजवाहनंविलोकयंत्यतिष्ठत्।सोपितस्यास्तदात्यादितभावरसानांसामग्र्यालब्धबलस्यवि
षमशरस्यशरव्यायमानसोवभूव॰सामनसीत्थमचिंतयत्॰अनन्यसाधारणसौंदर्येणानेनकस्या
पुरिभाग्यवतीनांतरुणीनांलोचनोत्सवःक्रियते॰पुत्ररत्नेनामुनापुरंध्रीणांपुत्रवतीनांसीमंतिनी

राम०
२५

नांकानामसीमंतमौक्तिकीक्रियते॰कास्यदेवी॰किमत्राकारणंकारणमस्यमन्मथोमामपहसितनिज
लावण्यमेनंविलोकयंतीमसूययेवातिमात्रंमथ्नन्निजनामसान्वयंकरोतिकिंकरोमिकथमयंज्ञात
व्यइति॰ततोबालचंद्रिकातयोरंतरंगवृत्तिभावविवेकैर्ज्ञीलाकांतासमाजसन्निधौराजनंदनोदंतस्य
सम्यगाख्यानमनुचितमितिलोकसाधारणैर्वाक्यैरभाषत।भर्तृदारिकेयंसकलकलाप्रवीणोदेव
तासांनिध्यकरणआहवनिपुणोभस्मरकुमारोमनोमन्त्रौषधिज्ञःपरिचर्यार्होभवत्यापूज्यतामिति।
तदाकर्ण्यनिजमनोरथमनुवदंत्याबालचंद्रिकयासंतुष्टांतरंगा॰तरंगावली॰मंदानिलेनेवसंकल्प
जेनाकुलीकृताराजकन्याजितमारंकुमारंसमुचितासनासीनंविधायसखीहस्तेनशस्तेनगंधकुसु
मास्तृतघनसारतांबूलादिनानावस्तुनिचयेनपूजांतस्मैकारयामासराजवाहनोप्येवमचिंतयत्।तानू
नमेषापूर्वजन्मनिमेजाया॰यज्ञवती॰नोचेदेतस्यां॰मेवंविधोऽनुरागोमन्मनसिनजायेत॰शापावसा

नसमयेतयोर्निधेर्जातिस्मरत्वमावयोः समानमेवा तथापि कालजनितविशेषसूचकवाक्यैरस्याज्ञान
मुत्पादयिष्यामि। तस्मिन्नेव समये कोपि मनोरमो राजहंसः केलीविधित्सया तदुपकंठमगमत्। स
मुत्सुकया राजकन्यया मरालग्रहणे नियुक्तां बालचंद्रिकामवलोक्य समुचितो वाक्यावसर एष इति
संभाषणनिपुणो राजवाहनः सलीलमलपत्। सुमुखि पुरा शांबो नाम कश्चिन्महीवल्लभः मनोव
ल्लभया यज्ञवत्या सह विहारवांछया कमलाकरमवाप्य तत्र कोकनदकदंबसमीपे निद्राधीनमान
सं राजहंसं शनैर्गृहीत्वा बिसगुणेन तस्य चरणयुगलं निगडयित्वा कांतामुखं सानुरागं विलोकयन्
मंदस्मितविकसितैककपोलमंडलस्तामभाषत। इंदुमुखि मया बद्धो मरालः शांतो मुनिवदास्ते स्वे
च्छयानेन गम्यतामिति। सोपि राजहंसः शांबमशपत्। महीपाल यदस्मिन्नंबुजखंडेऽनुष्ठानपरायण
तया परमानंदेन तिष्ठंतं नैष्ठिकं मामकारणं राज्यगर्वेणावमानितवानसि तदेतत्पाप्मना रमणीवि

रहःसंतापमनुभवति॰ विषमवदनः शांबोऽजीवितेश्वरीविरहमसहिष्णुर्भूमौ दंडवत्प्रणम्य सविन
यमभाषत। महाभाग यदज्ञानेनाकरवं तत्क्षमस्वेति। स तापसः करुणाकृष्टचेतास्तमवदत्॰ राज
न्निह जन्मनि भवतः शापफलाभावो भवतु। मद्वचनस्यामोघतया भाविनि जनने शरीरांतरगताया
अस्याः सरसिजाक्ष्या रसेन मुहूर्त्तद्वयं मच्चरणयुगलबंधनकारितया मासद्वयं शृंखलानिगलित
चरणोरमणीवियोगविषादमनुभूय पश्चादनेककालं वल्लभेन तया सह राज्यसुखं लभस्वेति। तद
नुज्ञातिस्मरत्वमपि तयोरनुग्रहात्॥ तस्मान्मरालबंधनं न करणीयं त्वयेति। सापि भर्तृदारिकातद्व
चनाकर्णनाभिज्ञातस्वपुरातनजन्मवृत्तांतमयं मत्प्राणवल्लभ इति मनसि जानती रागपल्लवितमा
नसा समंदहासमेवमवोचत्॥ सौम्य पुरा सांबाय ज्ञवती संदेशपरिपालनाय तथाविधं हंसबंधन
मकार्षीत्। तथाहि लोके पंडिता अपि दाक्षिण्येनाकार्यं कुर्वंतीति। कन्याकुमारावन्योन्यपुरातनज

द॰पू॰
२९
27

ननामधेययविचितेःपरस्परत्नानायसाभिन्नमुक्तामनोजरागपूर्णमानसौबभूवतुः।तस्मिन्नेवस
येमालवेंद्रमहिषीपरिजनपरिवृतादुहितृकेलीविलोकनापतंदेशमवाप।बालचंद्रिकातुतांदूर
तोविलोक्यससंभ्रमंरहस्यनिर्भेदभियाहस्तसंज्ञयापुष्पोद्भवसेव्यमानंराजवाहनंवृक्षवाटि
कांतरितगात्रमकरोत्।सामानसारमहिषीसखीसमेतायादुहितुर्नानाविधांविहारलीलामनु
भवंतीक्षणंस्थित्वादुहित्रासमेतानिजागारगमनायोद्युक्ताबभूव।मातरमनुगच्छंत्यवंतिसुंदरी
राजहंसकुलतिलकविहारवांछयाकेलीवनेमदंतिकमागतंभवंतमकांडएवविसृज्यमयास
मुचितमितिजनन्यनुगमनंक्रियतेतदनेनभवन्मनोरागोन्यथामाभूदितिमरालमिवकुमारमु
द्दिश्यसमुचितालापकलापंवदंतीपुनःपुनःपरिवृत्तदीननयनावदनंविलोकयंतीनिजमंदि
रमगात्।तत्रहृदयवल्लभकथाप्रसंगेबालचंद्रिकाकथिततदन्वयनामधेयामन्मथबाणपत

राम॰
२९

नव्याकुलमानसाविरहवेदनयाबहुलपक्षशशिकलेवक्षामक्षामाहारादिसकलव्यापारंप
रिहृत्यरहस्यमंदिरमलयजरसक्षालितपल्लवकुसुमकल्पिततल्पतलायातत्तनुलताबभू
वातत्रतथाविधावस्थामनुभवंतीमन्मथानलसंतप्तांस्वकुमारतनुंकुमारीनिरीक्ष्यखिन्नावय
स्यागणाःकांचनकलशसंचितानिहरिचंदनोशीरघनसारमिलितानितदभिषेककल्पितानि
सलिलानिबिसतंतुमयानिवासांसिनलिनीदलमयानितालवृंतानिचसंतापहरणानिबहू
निसंपाद्यतस्याःशरीरमशिशिरयता।तदपिशीतलोपचरणंसलिलमिवतप्ततैलेतदंगेदह
नमेवसमंतादाविश्चकार।किंकर्त्तव्यतामूढाविषण्णाबालचंद्रिकामीषदुन्मीलितेनकटाक्षवी
क्षितेनबाष्पकरणाकुलेनविलोक्यविरहानलोत्थनिःश्वासग्लपिताधरयानतांग्याशनैःसगद्
दमलापि।प्रियसखिकामःकुसुमायुधःपंचबाणइतिनूनमसत्यमुच्यते।अयमहमयोमयैर

र॰म॰
२८
28

संरब्धैरिषुभिरनेन हन्ये। सखि चंद्रमसं वडवानलादतितापकरं मन्ये यदस्मिन्नंतः प्रविशति शुष्यति
पारावारः सति निर्गते तत्दैव वर्द्धते। दोषाकरस्य दुष्कर्म किं वर्ण्यते मया यदनेन निजसहोदर्याः पद्मा
लयायां गेहमस्तमपि कमलं विहन्यते। विरहानलसंतप्तहृदयस्य स्पर्शेन नूनमुष्णीकृतः स्वल्पीभ
वति मलयानिलः नवपल्लवकल्पितं तल्पमिदमनंगाग्निशिखापटलमिव संतापं तनोस्तनोति।
हरिचंदनमपि पुरा निजयष्टिसंश्लेषवदुरगरदनलिप्तोत्वणगरलसंकलितमिव तापयति शरी
रं तस्मादलमलमायासेन। श्रीतल्लोपचारैर्लावण्यजितमन्मथो राजकुमार एवागदंकारो मन्मथ
ज्वरापहरणे। सोपि लब्धुमशक्यो मया किं करोमीति। बालचंद्रिका मनोजज्वरावस्थायां परमकाष्ठां ग
तां कोमलांगीं तां राजवाहनलावण्याधीनमानसां मन्मथशरणामवेक्ष्यात्मन्यचिंतयत्। कुमारः
सत्वरमानेतव्यो मया नो चेदेनां स्मरणीयां गतिं नेष्यति मीनकेतनः। तत्रोद्याने कुमारयोरन्योन्या

रम॰
२८

लोकनवेलायामसँमयोचितकरणीयचतुरंसखीगणांनियुज्यराजकुमारमंदिरमवाप।पुष्पबाण।
बाणातूणीरायमा + मसायकःसमंमुक्तसायकोभूत्‌ तस्मात्कुमारान्नयनंस्मरकरं।ततोवंतिसुंद
रीरक्षणायस + नमानसोनंगतप्तावयवसंपर्कपरिम्लानपल्लवशयनमधिष्ठितोराजवाहनः
प्राणेश्वरीमुद्दिश्यसद्पुष्पाङ्कवेनसंल्लयन्नागतांप्रियवयस्यामालोक्यपादमूलमन्वेषणीया
लतेवबालचंद्रिकाऽगतेतिसंतुष्टमनाःनिटिलतटमंडनीभवद्बुजकोरकाकृतिलसदंजलिपु
यमितोनिषीदेतिनिर्दिष्टसमुचितासनासीनामवंतिसुंदरीप्रेषितंसकर्पूरंतांबूलंविनयेनद
दतींतांकांताहृन्नातमपृच्छत्‌ तयासविनयमभाणि।देवक्रीडाभवनेभवदवलोकनकालमारभ्य
मन्मथमथ्यमानापुष्पतल्पादिषुतापशमनमलभवतीवामनेनेरोन्नततत्फलमलभ्य तदुः
स्थलालिंगनसौख्यस्मराधतपालिस्तुःसास्वयमेवपत्रिकामालिख्यवल्लभायेनामर्पयेतिमांनियु

क्कवती। राजकुमारः पत्रिकां तामादाय पपाठ। सुभगकुसुमसुकुमारं जगदनवद्यं विलोक्य ते रूपं।
मम मानसमभिलषति त्वं चित्तं कुरु तथा मृदुलं इति पठित्वा सादरमभाषत। सखि छायावन्मामनु
वर्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव तस्या मृगीदृशो बहिश्चराः प्राणा इव वर्त्तसे त्वच्चातुर्यम
स्याः क्रियालताया आलवालमभूत् तदविलंबं करिष्यामि। न तां प्राणमन्मनःकाठिन्यमाख्याति यदाके
लीवने गतमना कुरंगनयनालोचनपथमवर्त्तत तदैवापहृतमदीयमानसा सा स्वमंदिरमगात।
सा चेतसो माधुर्यं काठिन्यं स्वयमेव जानाति। दुःकरः कन्यांतःपुरप्रवेशः तदनुरूपमुपायमुपग
च्छ। स्वः परश्वो वा नतांगीं संगमिष्यामि। मदुदंतमेवमाख्याय शिरीषकुसुमस्य कुमार्या यथा श
मुखपिधानयास्थाल्यामन्नमंडमगालयत् दर्व्या चाविघट्टमानया परिवर्त्य समपाकेषु सिक्थेषु तां स्थालीमधो
मुखमवातिष्ठिपत् तदिंधनान्यंतःसाराण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीनि कृष्णांगारीकृत्य तदर्थिभ्यः प्राहिणो
त् एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलमामलकं चिंचाफलं च यथालाभमानयेति तथानुष्ठिते च
तया द्वित्रानुपदंशानुपपाद्य तदन्नमंडमार्द्रवालुकोपहितनवशरावगतमतिमृदुना तालवृंतानिलेन शीतला
कृत्य सलवणसंभारं दत्तांगारधूपवासं च संपाद्य तदप्यामलकं श्लक्ष्णपिष्टमुत्पलगंधि कृत्वा धात्रीमुखेन
स्नानाय तमचोदयत् तया च स्नानशुद्धया दत्ततैलामलकः क्रमेण सस्नौ स्नातः सिक्तमृष्टे कुट्टिमे फलकमा
रुह्य पांडुहरितस्य त्रिभागशेषलूनस्यांगणकदलीपलाशस्योपरि शरावद्वयं दत्तमार्द्रमभिमृशन्नतिष्ठत्
सा तु तां पेयामग्रे समुपाहरत् पीत्वा चापनीतघर्मक्लमः प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोऽभूत् ततस्तस्य शा
ल्योदनस्य दर्वीद्वयं दत्त्वा सर्पिर्मात्रां सूपमुपदंशं चोपजहार इमं च दध्ना च त्रिजातकावचूर्णितेन सुरभिशीतला

६.

भ्यांचकालशेयकांजिकाभ्यांशेषमन्नमभोजयत् सशेषएवांधस्यसावतर्पयत् अयाचतचपानीयं अथ
नवभृंगारसंभृतमगुरुधूपधूपितमभिनवपाटलाकुसुमवासितमुत्फुल्लोत्पलग्रथितसौरभंवारिधारामात्मना
पातयांबभूव सोपिमुखोपहितशरावेणहिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्माधारारवाभिनंदि
तघ्राणास्पर्शसुखोद्भिन्नरोमांचकर्कशकपोलः परिमलवाहोत्पीडफुल्लघ्राणरंध्रोमाधुर्यप्रकर्षावर्जि
तरसनेंद्रियस्तदच्छपानीयमाकंठमपपौ शिरःकंपसंज्ञावारितावपुनरपरेणकरकेणाचमनमदत्त कन्या
वृद्धयातुतदुच्छिष्टमपोह्यहरितगोमयोपलिप्तेकुट्टिमेस्वमेवोत्तरीयकर्पटंव्यवधायक्षणमशेत परि
तुष्टश्चविधिवदुपयम्यकन्यांनिन्ये नीत्वैतदनपेक्षःकामपिगणिकामवरोधमकरोत् तामप्यसौप्रियसखी
मिवोपाचरत् पतिंचदैवतमिवमुक्ततंद्रापर्यचरत् गृहकार्याणिचाहीनमन्वतिष्ठत् परिजनंदाक्षिण्यनिधि
रात्माधीनमकरोत् तद्गुणावशीकृतश्चभर्त्तासर्वमेवकुटुंबंतदायत्तमेवकृत्वातदेकाधीनजीवितशरीरस्त्रिव

60

राम.
६.

गेनिर्विवेश तद्ब्रवीमि गृहिणः प्रियहिताय दारगुणा इति ततस्तेनानुयुक्तो निबवतीवृत्तांतमाख्यातवा
न् अस्ति सौराष्ट्रेषु वलभीनाम नगरी। तस्यां गृहगुप्तनाम्नो गुह्यकेंद्रतुल्यविभवस्य नाविकपतेर्दुहि
ता रत्नवतीनाम तां किल मधुमत्याः समुपागम्य बलभद्रो नाम सार्थवाहपुत्रः पर्यणैसीत् तयापि नव
वध्वा रहसि रभसविघ्नितसुरतसुखो ऽघ्नादिति द्वेषमल्पेतरं बबंध न तां पुनर्द्रष्टुमिष्टवान् तद्गृहगमनम
पि सुहृद्वाक्यशतातिवर्त्तीलज्जया परिजहार तां च दुर्भगां तदाप्रभृति स्वे चैनेयं रत्नवती निर्ववतीचेयमिति स्व
जनः परिजनश्च परिबभूव गते च कस्मिंश्चित्काले तां तैरसानुतप्यमाना कामे गतिरिति विमृशंती कामपि
वृद्धप्रव्राजिकां मातृस्थानीयां देवशेषकुसुमैरुपस्थितामपश्यत् तस्याः पुरो रहसि सकरुणं रुरोद तया
प्यश्रुमुख्यां बहुप्रकारमनुनीय रुदितकारणात्पृष्टा त्रपमाणापि कार्यगौरवात्कथंचिदब्रवीत् अंब किं ब्र
वीमि दौर्भाग्यं नाम जीवन्मरणमंगनानां विशेषतश्च कुलवधूनां तस्याहमप्युदाहरणभूता मातृप्रमु

खोपि ज्ञातिवर्गो मामवज्ञयैव पश्यति ॥ तेन सुहृष्टां मां कुरु ॥ नवेत्स जेयमस्यैव निश्चयो जनान्याराणानाविरमा
च्छेमे रहस्यं नश्राव्यमिति पार्श्वयोः पपात सेनामुख्याथ्या द्याष्याप्रोवाच वत्से माच्य वस्यः साहसमियमास्मित्वन्नि
देशवर्त्तिनी यावत्तिमयो यो यो गत्तावत्तिभवाप्य नन्याधीनाय घेवासि निर्विस्मातयश्च वरलं मदधिष्ठितापारलौ
किकाय कल्याणाय ॥ नन्वयमुदर्कः प्राक्तनस्य दुष्कृतस्य यदनेनाकारेणादृशेन शीलेन जात्या चैवं भूतया
समनुगतया सत्यकस्मादेव भर्त्रा देष्यतां गतासि यदि कश्चिदस्त्युपायः पतिस्नेहप्रतिक्रियायै दर्शयामनुमतिर्हि
ते घटीयसीति अथासौ कथंचित्सखीमधोमुखीव्यालादीर्घोष्णमभ्यासपूर्वमवोचत् भगवति पतिरेकं दै
वतं वनितानां विशेषतः कुलजानां अतस्तच्छुश्रूषणाप्युपायहेतुभूतं किंचिदाचरणीयं अस्त्यस्मत्पति
वेश्यो वणिग्गणाभिजनेन विभवेन राजांतरंगभावेन च सर्वयोग्यमतीत्य वर्त्तते ॥ तस्य कन्या कनकवती नाम मत्स
मानवयोरूपावयवा मम मा॥ ति स्निग्धा सखी तया सह तद्विमानहर्म्यतले ततोपि द्विगुणां मंडिता विहरिष्यामि

लयानुतन्मात्प्रार्थेनंनामसकरुणामभिधायमत्यतिरेतन्दहंकथंचनानेयःसमीपगतेषुयुष्मासुक्रीडा
मत्तानामकेंदुकंन्त्रशायेयं अथतमादायतस्यहस्तेदत्वावक्ष्यसि पुत्रत्तवेयभार्यासखीनिधियति
दत्तस्यसर्वश्रेष्ठिमुख्यस्यकन्याकनकवतीनामत्वामियमनवस्थानिष्करुणाश्चेतिरत्नवतीनिमित्तमत्य
र्थेनिंदतितत्स्येषकंदुकोविपक्षधनेनप्रत्यर्पणीयइतिसतथोक्तोनियतमुन्मुखोभ्यत्तामेवप्रियासखी
मन्यमानोमांवक्षांजलियाचमानायेमत्यंभूयस्त्वत्प्रार्थितःसाभिलाषमर्पयिष्यति तेनरंध्रेणापश्लि
ष्यराग्मुन्मुखीकृत्यपथासौकृतसंकेतोदेशांतरमादायमांगमिष्यतितथोपपादनीयमिति हर्षादुपे
तयावानयातथैवोपपादितं अथताकनकवतीतिहृष्टतापसीविप्रलब्धोबलभद्रःसरत्नसाराभरणामा
दायनिशिनीरंध्रतमसिप्रावसत्सातापसीवार्त्तामायादयत मदेनमथानिर्निमित्तमुपेक्षितारत्नवतीश्वशु
रोचपरिभ्रतोसुरस्यश्चातिवर्त्तितास्तदैवसंदृष्टोजीवितुंजिह्मेमीतिबलभद्रःप्रर्वेषुर्मामकथयत नूनम

६२
62

सोतेननीतांव्यक्तिस्त्वाचिराद्रविष्यतितच्छुत्वातत्कांधवात्तरन्वेषणंप्रतिशिथिलयत्नाःस्तस्थुः रत्नवतीतुमा
र्गेकांचित्पथपदासींसंगत्यतयोत्थमानयाथैयाद्युपस्कराखेटकपुरमगमत् अमुत्रचव्यवहारकुशलोबल
भद्रःस्वल्पेनैवमूल्येनमहद्धनमुपार्जयत् पौराग्रगण्यश्चासीत् परिजनश्चमहत्यानर्थवशात्समाजगाम
ततस्तांप्रथमदासीनकर्मकरोषिहृष्टमुत्साहस्यप्रियंब्रवीषीतिपरुषमुक्त्वाबहुताडयत् चेटीतुप्रसा
दकालोपाख्यानरहस्यासाद्यन्तंतेकदेशमात्रेणाभिनिर्बिभेद तच्छुत्वालुब्धेनतुदंडवाहिनापौरवृद्धसन्नि
धौनिधियन्तिरत्नस्यकन्यकांकनकवतींमोषेणापहृत्यास्मत्पुरेनिवसत्येषभद्रमतिर्बलभद्रस्तस्यसर्वस्वहरणं
न्यायवद्भिःप्रतिबंधनीयमितिनितरामतर्जयत् भीतंचबलभद्रमभिजगादरत्नवती नभेतव्यमेवंब्रूहि नेयंनि
धिपतिरत्नकन्याकनकवती वलभ्यामेवगृहगुप्तदुहितारत्नवतीनामेयंदत्तापितृभ्यांमयाचन्यायोद्वाहेनचेय
तोष्यप्रतिभिर्विप्रहितागुत्वस्यावंचुपार्श्वमितितेनबलभद्रस्ततयोक्तःप्रतिभागेनतावदवतिष्ठतयावन्नसुर

राम॰
६२

वृद्धलेख्यलब्धवृत्तांतो गृहगुप्तः खेटकपुरमागत्य सद्यजामातृदुहितरावतिप्रीतः प्रत्यनैषीत् तथाद्द
ष्ट्वा रत्नवती कनकवतीति भावयतस्तस्यैव वल्लभद्दूस्याति वल्लभा जाता लब्धवीमिकस्सेनानामसकल्प
इति तदनंतरमसौ निर्तंबवती वृत्तान्तमप्राक्षीत् सोऽहमब्रवं अस्ति शूरसेनेषु मथुरा नाम नगरी तत्र
कश्चित्कुलपुत्रः कलासु गणिकासु चातिसक्तो मित्रार्थं कलत्रार्थं च स्वभुजमात्रनिर्दिष्टानेककल
हः कलहकंटक इति कर्कशैरभिख्यापितो ख्यः प्रत्यवात्सीत् स चैकदा कस्यचिदागतोश्चित्रकरस्य
हस्ते चित्रपटं ददर्श तत्र कस्याश्चिदालेख्यगता युवतिरालोकमात्रेणैव कलहकंटकस्य कामातुरं चे
तश्चकार सं च तमब्रवीत् भद्र विरुद्धमिव तत्प्रतिभाति यतः कुलजा दुर्लभेव पुराभिजात्यशंसिनी च न
म्रता पांडुरा च मुखच्छविर्नीतिपरिभुक्ता सुलभा च नुःप्रोटतां तु विशाच दृष्टिः न चैषा प्रोषितभर्तृका प्रवा
सचिन्हस्यैवेणपादेरदर्शनात् लक्ष्म चैतद्दक्षिणापार्श्वे चर्न्नितदियं वृद्धस्य कस्यचिद्राजो नातिपुरुष

स्यथार्हभोगाल्लाभपीडिताग्रहिणीत्वयातिकोशला यथादृष्टमालिखितामवितुमर्हतिसततमतिप्रति
शस्याशंसतसत्यमिदमवंतिपुर्यामुज्जयिन्यामनंतकीर्त्तिनाम्नःसार्थवाहस्यभार्यायथार्थनामानितंब
वतीनामैषासोदृश्येविस्मितेनमयैवमालिखितेति सततदेवोन्मनायमानस्तद्दर्शनायप्रवव्राजोज्जयिनी
भार्गवोनामभूत्वाभिक्षानिभेनतद्गृहंप्रविश्यैनांददर्शदृष्ट्वाचात्वारूढमन्मथोनिर्गत्यपौरमुखेभ्यःश्मशा
नरक्षामयाचततान्नमतच तत्रलब्ध्वाश्वावगुंठनपटादिभिःकामथर्हहतिकांनामश्रमणिकामुपासांचक्रे
तन्मुखेनचनितंबवतीमुपामंत्रयामास साचैनांनिर्भर्त्सयंतीप्रत्याचचक्षे श्रमणिकामुखाच्चदुष्करशी
लमंत्रशांकुलस्त्रियमुपलभ्यरहसिदूतिकामशिक्षयत भद्रेयामुपतिष्ठसार्थवाहभार्यांब्रूहिवोपद्करे सं
सारदोषदर्शनात्समाधिमास्थायमुमुक्षमाणामादृशोजनः कुलवधूनांशीलपातनेघटतइतिघघटते
एतदर्पयित्वामत्पुराग्यासमक्ष्यारूपेणातिमानुषेणप्रथमेनवयसोपपन्नाकिमितरनारीसुलभंचापलंस्य

ष्टं नैवेति परीक्षा कृता। तुष्टास्मि तथैव मद्दुष्टस्वभावतया त्वामिदानीमुत्पन्नापत्यां द्रष्टुमिच्छामि भर्त्ता तु
भवत्याः केनचिद्ग्रहेणाधिष्ठितः पांडुरोगदुर्बलो भोगे चासमर्थः स्थितो मूत्तन च शक्यं तस्य विघ्नमप्रतिकृत्या
पत्यमस्माल्लभ्यं अतः प्रसीद वृक्षवाटिकामेकाकिनी प्रविश्य मदुपनीतस्य कस्यचिन्मंत्रवादिनश्छ
त्रमेव हस्ते चरणामर्षयित्वा तदभिमंत्रितेन प्रणयकुपितानामभूत्वा भर्त्तारमुरसि प्रहर्त्तुमर्हसि उप
र्यसावुत्तमधातुपुष्टिमूर्जितां यत्सोत्सादनक्षमामासादयिष्यति अनुवर्त्तिष्यते देवीमिवात्रभ
वतीनात्र शंका कार्येति सा तथोक्ता व्यक्तमभ्युपेष्यति नक्तं मां वृक्षवाटिकां प्रवेश्य तामपि प्रवेशयिष्य
सि तावतैव त्वयाहमनुगृहीता भवेयमिति सा तथैवोपपादितवती सोतिप्रीतस्तस्यामेव क्षपायां वृ
क्षवाटिकायां गतो नितंबवती निर्ग्रंथिका प्रयत्नेनोपनीतां पादेयणाम्रात्रिवहेमनूपुरमेकमाकृष्य छुरिक
योरुमूले किंचिदालिख्य द्रुततरमुपासरत् सा तु सां द्रुत्वा सा स्वमेव दुर्नयं गर्हमाणा जिघांसती वध्र्ममरीकां

तद्वर्णंभवनदीर्घिकायांप्रक्षाल्यदृत्त्वापटबंधंसामयापदेशाद्यंरंचानीयनूपुरंशयनपरात्रिचतुरा
णिदिनान्येकांतेनिम्य सतुश्चत्तौविक्रेष्यइतितेननूपुरेणातमनंतकीर्त्तिमुपाससाद सतुदृष्ट्वामममगृहि
णायाएवेषनूपुरःकथमयमुपलब्धस्त्वयेतितमब्रुवाणानिर्बंधेनपप्रच्छ सतुवणिग्ग्राममस्यायेवक्ष्या
मीतिस्थितोभूत् पुनरसौस्वगृहिणीपस्वनूपुरयुगलेप्रेषयेतिसंदिदेश साचसलज्जंससाध्वसवाघरात्रौ
विश्रामप्रविष्टायांवृक्षवाटिकायांप्रभ्रष्टोममैकःप्रशिथिलबंधोनूपुरःसोद्यान्विष्टोनदृष्टःसपुन
रयद्वितीयइत्यपरंप्राहिणोत् अनयाचवार्त्तयाऽमुंपुरस्कृत्यसवणिग्जनसमाजमाजगाम सचानुपु
क्तोधूर्त्तःसविनयमावेदयत् विदितमेवखलुवोयथाहंयुष्मदाज्ञयापितृवनमभिरक्ष्यतदुपजीवीप्रति
वसामि लुब्धाश्चकदाचिन्मदर्शनभीरवोनिशिदहेयुरपिशवानीतिनिशास्वपिश्मशानमधिशये अप
रेद्युर्दग्धार्द्धमृतकंचितायाःप्रसभमाकर्षंतीश्यामांनारीमपश्यं अर्थलोभात्तुनिगृह्यसाध्वसंसाग

हीताः शाक्विकयोरुल्लेय दृच्छयाकिंचिल्लिखितं एषचन्द्रपुरस्थ्यरणादास्मिन्स्त्राक्स्येव द्रुतगतिः सापलापि
ष्टासोयमस्यागमः परभवतः प्रमाणामिति विमर्शे च तस्याः शाकिनीत्वमेकमत्येनपौरणामभिमतमासीत्
मत्रचिपरित्यक्तातस्मिन्नेवश्मशानेबहुविलक्ष्यपाशेनावध्यमन्तुकामातेनधूर्तेननक्रमगत्स्यत अनुनी
ताचसुन्दरित्वराकारोन्मादितेनमयात्वद्दर्शनेनबहूनुपायानभिश्रुत्कीमुखेनोपन्यस्यतेष्वसिद्धेषु
पुनरयमुपायोयावज्जीवमसाधारणीकृत्यरत्नुमाचवितस्तत्प्रसादानन्यशरणायास्मैदासजनायेतिमुहु
र्मुहुःप्रार्थनायोनिपत्यप्रयुज्यसांत्वशतानितामगत्यंतरामात्मवश्यामकरोत् तदिदमुक्तंदुष्करसाधनंप्रे
ति इदमाकर्ण्यब्रह्मराक्षसोमामपूजयत् अस्मिन्नेववक्ष्यणोनातिप्रौढपुन्नागमुकुलस्थूलानिमुक्ताफला
निसहसलिलविंदुभिरंबरतलादपतन् अहंतुकिंन्विदमितुच्चक्षुरालोकयकमपिराक्षसंक्वाविद्वेषमा
नगात्रीमंगनामाकर्षंतमपश्यं कथमयंयविहरस्यकामामपिस्त्रियमनाचारोनेश्वंत इतिगगनगमन

६५
65

मंदशक्तिर्निःशस्त्रश्चातेथ सतु मत्तं संबंधी ब्रह्मराक्षसमत्तिष्ठ तिष्ठ पापव्यापहरसीति भर्त्सयन्नुत्थाय राक्षसेन
सममसज्यत तां तु रोषादनपेक्ष्यापविद्धाम मरुवृक्षमंजरीमिव तातरिक्षादापतंती मुन्मुखप्रसारितोभयक
रः सहृदयमग्रहीष उपजस्यचवेपमानां संमीलिताक्षीमदंगस्पर्शसुखेनोद्भिन्नरोमांचां ताहमीमेवानव
तारयन्नतिष्ठं तावत्तावुभावपि शैलशृंगाभंगैः पादपैश्च रभसोन्मूलितैर्मुष्टिपादप्रहारैश्च परस्परमसपय
तां पुनरहमतिमृदु निपुलिनवतिकुसुमलनवलंतां छिते सरस्तीरे वेरोप्य सस्पृहं निर्वर्णयं स्तां मत्वारोकव
ल्लभां राजकन्यकां कंदुकावतीमलक्ष्यं सापि मम पासमभ्याप्य आस्य मानातिर्यंड्याम भिनिरूप्य जातप्रत्यभिज्ञा स
करुणाम रोदीद्वारीच नाथ त्वदर्शनानुपोदरा गातस्मिन्कंदुकोत्सवे पुनः सख्या चंद्रसेनया त्वत्कथाभिरेव स
माश्वासितास्मि त्वं किल समुद्रमध्ये मज्जितः पापेन मम भ्रात्रा भीमधन्वनेति कृत्वा स्वीजनं परिजनं च वंचयि
त्वा जीवितं जिहासुरेकाकिनी क्रीडावनमुपागमं तत्र च मामवकमततकाम रूप एष राक्षसाधमः सोयं मया भीत

एम·
६५

यावद्भूतप्रायेण नःस्फुरंतीमांनिरग्रस्थाम्भ्यधावत् अत्रैवमवसितोमृतत अहंचदैवान्नैवजीवितेशस्यहस्तेप
तितामहं त्वेवेति श्रुत्वाचतयासहावरूढ्यनावमध्यारोह मुक्ताचनौःप्रतिवातप्रेरिताताभेवदामलिप्तांप्रस्थु
पातिष्ठततत्रवरूढाश्चवयमश्रमेणातनयस्यचनयायाश्चनाशारनयत्यत्सुगंधन्वाससुखपतिर्विकलःस्वप
मेकत्रसकलत्रएवनिष्फलंकेगंगाद्वारेधस्नानशनेनोपरंतुप्रतिष्ठेतेसहतेनमर्तुमिच्छत्स्वनम्यनाथोनुरक्तःपो
रक्तस्थलोकइत्यसुसुखिनांप्रजानामात्रेदमस्तरणुम अथाहमस्मैराज्ञेपथ्याहन्नमाख्यायतस्यतस्थ्यंप्र
र्पितवान् प्रीतेनतेनजामाताकृतोस्मिदामलिप्तेश्वरेणा ततस्तुत्रामदनुजीवीजातः मद्राज्ञेमेनचामुनाप्रा
गावद्धुज्झितांचंद्रसेनाकोमारदासमेवाभजत ततश्चसिंहवर्मसाहाय्यार्थमत्रागत्यभर्तुस्तवदर्शनात्स्वसु
खमनुभवामीति श्रुत्वाचित्रंयदैवगतिरवसरेषुपुष्कलःपुरुषकारइत्यभिधायभूयःस्मितापिविक्तंदंतछदा
मेत्रगुमेहर्षोत्फुल्लंचक्षुःपातयामासदेवोराजवाहनःसकिलकरकमलेनकिंचित्संहृताननोललितवल्लभार

६६

66

भसदन्नं दंतक्षततव्यसनविक्लवाधरमणिर्निरोष्ठ्यवर्णमात्मचरितमाचचक्षे॥ ॥ ॥इति दंडिनः कृतौ द
शकुमारचरिते मित्रगुप्तचरितं नाम षष्ठ उच्छ्वासः॥ ॥श्रीः॥ ॥राजाधिराजनंदननगरं प्रगतस्य ते गतिं
ज्ञास्यन्नहं गतः कदाचित्कलिंगान् कलिंगनगरस्य च नात्यासन्नसंस्थितजनेराहस्थानसंसक्तस्य कस्य
चित्कांतारधरणीरुहस्याधस्तीर्णसरसकिसलयस्रस्तरे तले निषघनिद्रालीढदृष्टिरशयिषि जगति च का
लरात्रिशिखंडजालकालांधकारे चरितरक्षसि स्फुरितनीहारे निजरनिलयनिलीननिःशेषजने नितांत
शीते निशीथे घनतरशाखिशाखांतरालनिद्रादिनिमैनेत्र निशिनी निद्रा निगूहत्कर्णदेशं गतं कथय ख
लेनानेन दग्धसिद्धेन निरसाकाले निदेशं दित्सन्नाजनरएष रागेणानर्गलेनानेनार्दित इत्थं खिलीकृतः कि
येतास्याराः कनरेंद्रस्य केनविदंतनशक्तिना सिध्यंतराय इति किंकरस्य किंकर्याश्चातिकातरं रटितं तदाकर्ण
करएष सिद्धः का च सिद्धिः किं चानेन किंकरेणाकरिष्यत इति दिदृक्षाक्रांतहृदयः किंकरगतया दिशा किंचिद

राम॰

६६

तरंगतस्तरल्लतरनरास्थिशकलरचितालंकारकांतकायं दहनदग्धकाष्ठनिष्ठांगाररजःकृतांगरागं तरल्लतडि
ल्लताकारजटाधरं हिरण्यरेतसमिव क्रोधकारं राक्षसं ईक्षमाणं गृहीतनानेषुनयासं च चदर्चि विदस्थितोते
राक्षसातिलसिद्धार्थकारी त्रिरतनं रचयचराधितानाकिरंतं कंचिद्राक्षसं तस्याग्रे सकृतांजलिः किंकरः किंक
रीचकरणीयं दीयतां निदेशइत्यतिष्ठत् आदिष्टश्चायं तेन निकृष्टाशयेन गच्छ कलिंगराजस्य कर्दनस्य
कन्यां कनकलेखां कन्यागृहादिहानयेति स तथाकार्षीत् ततश्चैनां त्रासेनालघीयसा सज्जर्जरेराचकं
ठेन रणतरणिकां गृहीत्वा न च हस्तेन हा तात हा जननीति क्रंदंतीं कीर्णग्लानशेखरस्रजि शीर्णनहने शिरसि
जातां स च येन निर्गत्य असिना शिलाशितेन शिरश्छिंदन्निव यावच्चेष्टते स्म इति तिष्ठति छिद्यत तस्य हस्तान्निशातस्त्रिकांत
यानिकृष्य तच्छिरः स जटाजालं निकटस्थस्य कस्यचित् जीर्णसालस्य स्कंधरंध्रे न्यदधिषि तन्निध्याय हृष्टतरः स
राक्षसः क्षीणाधिरकथयत् आर्यकदर्यस्यास्य कदर्थनान्न कदाचिन्निद्रायाति नेत्रे तर्जयति त्रासयति चाकुले

६७ 67

चात्रादुदाततितरङ्गकल्पाराणाशिनासाधीयः क्षतं यदेषनरेन्द्रकाकः कारणानां नारकीणां रसज्ञानायनीतः शेतेशी
तेतरदीधितिर्देहजस्यनगरे तदस्लिखदयानिधेरनन्ततेजसस्तेयजनः कांचिदाज्ञांचिकीर्षसादिशाल्लंकालहर
णोनेत्यनंसीत् आदिशंचतंसखेसेघासज्ञनाचरितासवर्णाः यदणीयसिकारणेनगणीयानादरः संदृश्यते
नचेदिदंनेच्छसि सेयसन्त्रतांगयष्टिरङ्केशाहीसत्यनेनाहत्यकारिणात्यर्थक्लेशिता नयेतांनिजनिलयना
न्यदित्तः किंचिदस्तिचिन्ताराधनेन इति अथतदाकर्ण्यकर्णोशेखरनीलनीरजापितांधीरेतरतारकां दृशंतिर्यक्क्षिप्त
किंचिदंचितंसंचारयतीसलिलचरकेतनशरासनानंतांविल्लिकालताललाटरंगतलच्छलनर्तकीं लीलाल
संलासयंतीकटकितगंडरेखारागलज्जांतरालसंचारिणीचरणाग्रेणातिरश्चीननखाचिह्नंद्विकेणाधरणीतलं
साचीकृताननसरसिजालिरंवतीदंतच्छदकिसलयलंघिनाहर्षास्रसलिलधारासीकरकणजालसंक्लेदितस्यस्त
नतटचंदनस्यार्द्रतांनिरस्यतासांतरालनिःसृतेननतनीयसानिलेनहृदयलक्षदलनदक्षरतिसहचरसायकस्य

राम॰ ६७

दयितेन तरंगितदशनचंद्रिकाणिकानिचिद्देतान्यक्षराणि कलकंठीकलान्यसृजत् आर्य्यकेन कारणेनेन दास
जनकालहस्तादाच्छिद्यानेन तरंगानिलचलितरणारणिकातरंगिणापनगसागरे क्रिरसियथा तेच रणासर
सिजरजःकणिकातथाहचिंतनीया यद्यस्तिदयातेत्रजनेनन्यदासजनसाधारणाःकरणीयःसएषचरणारा
धनक्रियायां यदिचकन्यागाराभ्यासनेरहस्यक्षरणादनर्थआशंक्यते नेतदस्ति नक्तंतराहिनस्सत्रसख्य
म्यचयश्चयथानकश्चिद्देतज्ज्ञास्यतिष्यतेइति सचाहं देहजेनाकर्णाकृष्टसायकेनचेतस्यतिनिर्दयं ताडितस्त
त्कराक्षकालायसनिगलगाटसंयतःकिंकराननिहितदृष्टिरगाद्दिंष यथेयंरथ्यचरणाजघनाकथयतितथा
चेन्नाचरेयंनयेतनक्रकेतनःक्षणेनेकेनाकीर्त्तनीयांदशां जनंचैवंमसहानयानयकन्यागृहंहरिणानयनये
ति नीतश्चाहं निशाचरेणाशारदजलधरजालकांतिकन्यकानिकेतनं तत्रचकांचित्कालकलांचद्रानमानिद
शांचद्रुशालेकदेशेतद्दर्शनचलितधृतिरतिष्ठं साचच्छदतःशयानाःकरतलालसंघट्टनानीतनिद्राःकाश्चिद

६८

६8

धिगतार्थाः सखरिकार्षीत अथागत्य ताम्रचरणानिहितशिरसः क्ष्मरस्वकरालितेक्षणानिजमेखरकेसराग्रसंल
ग्नषट्चरणागणारणितसंश्रयितकलगिरः श्वानैरकथयन् आर्येयस्मादित्यतेजसस्तारणध्यानयनलक्षताग
तातततः कृतांतेननगर्हीता रत्नाचेयं चित्तजेनगरीयसासाक्षीकृत्य रागानलं ततदेनेनाश्चर्यरत्नेननलिनाक्ष
स्यतेरत्नशैलशिलातलास्थिरं रागतरलेनालंक्रियतां हृदयं तदस्याश्चरितार्थस्तनतटगौरालिंगनैः सहधातरस
सहचरस्येति ततः सखीजनेनातिदृसिरोनहृदतरीकृतस्वेहनिगलस्तयासखीतांग्यासंगत्वारसिवि अथक
दाचिदायासितजायारहितचेतसिलालसालिलंघनम्लानसारकेसरेराजदरापरत्थलीललाटलीलायितति
लकेललितांनगराजांगीकृतनिर्रि उकणिकारकांचनछत्रेदृस्सिरादहनसारथिरयाहतसहकारांगलग्नचं
चलकलिकेकालांउज्जकंठगागरक्षरत्नोधरारतिरणाग्रसन्नाहहालिनिधालीनकन्यकांतःकरणासंक्रांतराग
लंघितलज्जेदर्दुरगिरितटचंदनाश्लेषशीतलानिलाचार्यदत्तलालालतानन्तलीलेकालेकलिगराजः सहा

रम.

६८

गनाजेनेनसहचतनययासकेलेनचनगरजेनेनदशत्रीणिदिनानिदिनकरकिरणाजालालंघनीयेरणादलिसं
घलंघितनतलतायकिसलयालीटसैकततलेतरलतरंगासीकरासारसंगशीतलेसागरतीरकानेनेक्रीडारस
जातासक्तिरासीत् अथसंततगीतसंगतलंगनासहस्रसंगारहेलानिर्गलानंगसंघर्षहर्षितस्वरागतस्लैक
तत्रस्तत्रंध्रनाथेनजयसिंहेनसलिलतरणासाधनानीतेनानेकसंख्येनानीकेनद्वागागत्यागस्थितसक
लेत्रः साचानीयतत्रासचंचलाक्षीदयितानःसहसविजनेनकनकलेखा तदाहदाहेनागजजनितेनातरि
ताहारचिंतश्चितयन्दयितांगलितगात्रकांतिरित्यतर्कंपगतासाकलिंगराजतनयाजनयित्राजनन्याचसहा
रिहस्तं निरस्तधैर्यस्तांसराजानियंतसंनिरीक्षत तदसहाचसासतीगरसादिनासद्यःसंतिष्ठत तस्यां
चतादृशीदशांगतायांजनस्यास्यानन्यजेनहमेतशरीरधारणाशाकास्याऽतितिरिति अत्रांतरेऽथनगराद्याग
च्छन्नग्रतःकश्चिदेक्ष्यत तेनचेयंकथाकथिता यथाकिलजयसिंहेनानेकनिकारदत्तसंघर्षेणाजिघांसि

६९

69

तःसकर्दैनःकनकलेखादर्शनैर्धिनैनरागेणारक्ष्यत साचदारिकायक्षेशाकेनचिद्रविदधिष्ठितानतिष्ठत्स्यग्रेनैं
दुस्यनरांतरस्यचा॥यस्यतिचनैर्द्रुसार्थसंग्रहरोगततिग्रराकरिष्यन्नेरंद्रोनवास्तिसिद्धिरितितेनचाहंदर्शिता
शःशाकरन्दन्नेरंगजातस्यजरत्सालस्यस्कंधरथान्नज्ञतराजालेनिकृष्यतेनजटिलतांगतःकंथाचीरसंचयात
रितगात्रःकांश्चिच्छिष्यानयद्दीषं तांश्चनानाश्चर्यक्रियातिसंधितांजनादाकृष्टान्नचेलादिस्यागान्निसह
ष्ठानकार्षम् अयासिषंचदिनैःकैश्चिदंध्रनगरं तस्यनात्यासन्नेसलिलराशिसदृशस्यकलहंसगणाद
लितनलिनदलसंहतिगलिततकिंजल्कशकलशारस्यसारसश्रेणीशेखरस्यसरसस्तीरकानने कृतनि
केतनस्थितःशिष्यजनकथितचित्रचेष्टाकृष्टसकलनागरजनातिसंधानदक्षःसन्दिशिदिशीत्यकीर्त्यज
नेन यरण्यजरद्दरापस्थलीसरस्तीरखंडिलशायीयतिस्तस्यकिलसकलानिसरहस्यानिषडंगानिछंदा
सिरसनायैसन्निहितानिअन्यानिचशास्त्राणीयनयानिनज्ञायंतेस्मतेषांतत्सकाशादर्थनिर्णयंकरिष्यति अस

राम॰
६९

त्येनास्यास्यसंसज्यते सशरीरश्चैव दयाराशिः एतत्संग्रहेणाद्य चिरं चरितार्था दीक्षा तत्र वरगारजःक
रोःकेश्चनशिरसि कीर्णैरनेकस्यानेकआतंकश्चिरं चिकित्सकैरसंहार्यैः संहृताः तदंघ्रिक्षालनस
लिलसेकैर्निष्कलंकशिरसोनश्यतितक्षरोगेनैकेनाखिलनरेंद्रयत्नलंघिनश्च उत्तराग्रहाःनतस्पशकं
शक्नोरियन्तो नानुन्नचास्याहंकारकणिकेति साचेयं कथानेकजनास्यसंचारिणीति तस्यकनकलेखा
धिष्ठानधनदाज्ञाकरनिराक्रियातिसन्नेचेतसः क्षत्रियस्याकर्षणायाशकन् सचाहरहरागसादरेणा
तिगरीयसाऽर्चयन्नर्थैश्च शिष्यासंग्रहणन्नधिगतक्षरोगः कदाचित्काङ्क्षितार्थसार्थसाधनायशनैस्या
विष्टध्यानधीरस्थानदर्शितज्ञानसन्निधिश्चैवं ननिचाय्याकथयं तातस्यानरेषयत्नः तस्यहिकन्यारत्नस्य
सकलकल्याणालक्षरौकराशेरधिगतिःक्षीरसागररसनालंकृतायागंगादिनदीसहस्रहारस्यष्टिराजि
तायाधरांगनाया आसादनाय साधनं नचसमयक्षस्तदधिष्ठायीकेनचिन्नरेंद्रेणतस्यालीलांचितनील

६०.
70

नीरजदर्शनायादर्शनंसहतेतद्वसत्यंतांत्रीरापहानिर्वैरहंयतिश्येऽर्थस्यासाधनायेति तथादिष्टेचरह
ष्टेक्षितीशेगतेनिशिनिर्णिशाकरार्चिर्विषिनीरंध्रांधकारनिकरनिगीर्णादशदिशिनिद्रानिगलितनिखिलज
नदृशिर्निर्गसजलतल्लनिलीनगाहनीयंनीरंध्रंकृच्छ्राच्छिद्रीकृतांतरालंतदेकतःसरस्तटंतीर्थासन्निकृष्ट
केनचित्वननसाधनेनाकार्ष घनशिलेष्टकाछन्नाच्छिद्रानंनंततान्तीरदेशंजनैरशंकनीयनिश्छिद्रस्यदिनादि
स्नाननिर्णिक्तगात्रश्चनक्षत्रसंतानहारयष्ट्यग्रग्रथितरत्नक्षणादांधकारंगंधहस्तिदारसौकके सरि
रांकनकशैलश्रृंगरंगलास्यलीलानटंगगनसामरघनतरंगराजिलंघनैकचंक्रकार्याकार्यसाक्षिणां
सहस्रार्चिषसहस्राक्षदिग्गनारक्तचंदनांगरागायितकिरणाजालंरक्तनीरजांजलिनाराध्यनिजनिके
तनन्यशिष्यश्रयंयातेचदिनत्रयेऽस्तगिरिशिखरगैरिकतटसाधारणाच्छायतेजस्यचलराजकन्याकरस्थे
नयोऽन्तरिक्षास्थेनशंकरशरीरेणासंसृष्टायाःसंध्यांगनायारक्तचंदनचर्चितेकस्तनकलशदर्शनीयेदिनाधि

राम.
६०.

नाथः स आगत्य जनस्यास्य चरणान् खकिरणाच्छादितकिरीटः कृतांजलिरतिष्ठत आदिष्टश्च दिष्ट्या
दृष्टेष्टसिद्धिः इह जगति न निरीहदेहिनः श्रियः संश्रयंते श्रेयांसि च सकलान्यनलसानां हस्ते निस
सान्निध्यानि यतस्ते साधीयसा सच्चरितेन नानाकलितकलंकेनांचितेन नात्यादरचरितेन नाकृष्टचेतसा ने
न जनेन सरस्तथा संस्कृतं यथेह तेषां सिद्धिः स्यात् तदेतस्यां दिशि गलदर्शीयां गाहनीयं गाहनानंतरं
च सलिलतले सततगतीनंतः संचारिणः सन्निरुह्य यथाशक्ति शय्या कार्या ततश्च तटस्खलितजल
जंघं उच्चलितं टंकं दुकं टंकाग्रदलितदेहराजहंसत्रासजर्जररमितसंदत्तकरौ स्यजनस्य क्षणाद्राक्
रोणीयं जनिष्यते जलसंघातस्य किंचिदारटितं शांते च तत्र जलरटिते क्लिन्नगात्रः किंचिदारक्तदृष्टिर्येना
रणानि यौस्य सिंजिचाप्यंते निखिलजननेत्रानंदकारिणां नसयक्षः शाश्वत्यप्रतः स्थितये स्थिरतरनिहि
तस्नेहरसखल्लानिगलितेच कम्पकाहृदयं श्रारोनेकेनासहनीयदर्शनांतराय स्यात् अस्याश्च धरांगनायाना

७१

71

त्याद्दतनिराकृतास्विचक्रं च चक्रं करतलगतं चिंतनीयं न तत्र संशयः तत्र्वेदिच्छस्यनेकशास्त्रज्ञानधीरधिषणैर

धिकृतैरितैरश्च हितैः षिगरोराकलष्पजालिकशां तचानाथ्यातं रगनरशतैर्यथेष्टदृष्टांतरालं सरः क्रियेत

रक्षा च तीरात्रिशंदडांतराले सैनिकजनेन सादरं रक्षणीया कस्तत्र जानाति यच्छिद्रं प्राप्य यश्चिकीर्षति त

मस्य हृद्रूपहारि जातं तदधिकृतैश्च तत्र कृत्सेरध्रुदर्शनासहैरिच्छां च राज्ञः कन्यकातिरागजनितां नितां

तनिश्चलां निश्चित्यार्थ एष न निषिद्धः तथास्थितश्च तत्प्रासादनस्थिराशयश्च स आख्यायत राजन्नत्र तेज

नां ते चिरं स्थितं न चैकत्र चिरस्थानं नः शास्त्रकृतकृत्यस्यैव हनदृष्टासि यस्य ते राष्ट्रे ग्रासाघ्रासादितं तस्य ते

किंचिद्दनाचर्य कार्यं गतिरार्थेग स्थेति अत्रैतच्चिरस्थानस्य कारणं तत्र्वा घसिंद्धगच्छगृहान्यथाहं जलेन

हृषगांधेन स्नानः सितस्वंगणारागः शक्तिसदृशेन दानेनाराधितधरणीतलतैतिलगणास्तिलस्नेहसिक्त यष्ट्य

ग्रथितकांर्तिकाग्निशिखासहस्त्रयस्तेनेशां धकारराशिरागत्यार्थे सिद्धये यतेथाः इति। स किल कृतज्ञतां दर्श

एम०

७१

यन्नसिद्धिरेषासिद्धियेद्दसद्धिधिरिहाचार्याणां कष्टाचेयंनिःसंगतायानिरागसंदासजनंत्याजयतिन
चनिषधनीपागरीयसांगिरः इतित्वानायगृहानयासीत् अहंचनिर्गत्यनिशीथेसरस्तीरंप्रनिलीनःस
न्नीषच्छिद्रद्दत्तकर्णःस्थितः स्थितेवार्द्धरात्रेकृतयथादिष्टक्रियःस्थानस्थानरचितरक्षःसराजाजालि
कजनानीकजिराकृत्तांतःशल्पःश्रांकाहीनःसरःसलिलंसलीलगतिरगाहतगतश्चकीर्णकेशांसं
हतकर्णानासिकंसरसस्तत्तेहास्तिनंनक्रलीलयानीरनिलीनयाततथाशयानंकंथयाकंधरायां
न्यग्रहीषं करतलकालदंडुघहन्नातिचडेश्चकरचरणाघातैर्निर्दयदत्तनिग्रहःक्षणेनैकेनाजहात्स
चेष्टां ततश्चाकृष्यतच्छरीरंतीरच्छिद्रेनिधायनीराग्निर्यासिषंसद्यःसंगतानांचसैनिकानांततदत्यचित्रीयताक
रांतेरग्रहराणां गजस्कंधगतःसितच्छत्रादिसकलराजचिन्हराजितश्चडतरदंडिताडनत्रस्तजनदत्तांतरथ्या
राजरथ्ययायाततस्तांनिशांनयरसनिरस्तनिद्रारतिरत्यनैषंनीतेचजनस्याखिलस्यतांलाक्षारसरि

७२

72

घदिग्गजशिरस्सदृक्षेन्द्राक्रदिंगगनारत्नास्थैःकैचक्रेकृतकरगीयःकिरराज्ञालकरालरत्नराजिराजि
तराज्ञार्हासनाध्यासीयथासदृशाचारदर्शिनःशंकायंत्रितांगानंसन्निधिनिषादिनःसहायानगादिषं
दृष्ट्वा तांशक्तिगर्भीयन्नस्ययतेरञ्जेयस्येंद्रियाणांसंस्कारेणानीरजसानीरजसान्निध्यशालिनिसह
षोलिनिसरसिसरसिजदलसन्निकाशच्छायस्याधिकतरदर्शनीयस्याकारांतरस्यसिद्धिरासीत् अ
घसकलनास्तिकानांजायेतलज्जानतंशिरः तदिदानींचद्रुशिखरनरकशासनसरसिजासनादीनांत्रि
दशानांस्थानान्यादरररचितनन्नगीताराधनानिक्रियंतांक्रियंतांचगरहादितःक्लेशनिरसनसहान्यर्थि
सार्थैर्धनानीति आश्चर्यरसातिरेकहृष्टदृष्टयस्तेजयजयजगदीशदशदिशःस्थगयन्निजेनतेजसादिग
जयशंसीत्यसकृदाज्ञास्याचरन्यथादिष्टाःक्रियाःसचाहंदयितायाःसर्वोहृदयस्थानीयांशशांकसे
नांकन्यकांकदाचित्कार्यांतरागतारहस्याचसिषिकश्चिदयंजनःकदाचिदासीदृष्टइति अथसाहर्ष

राम॰

७२

काष्ठांगतेन हृदयेनेषदालक्ष्य दशनदीधितिलतां लीलालसं लासयन्ती हसंती ललितां चितकरशाखां
तारितं दंतच्छदकिसलयाद्धर्षजललेशजर्जरं निरंजने क्षणगारचिताञ्जलिर्निर्गतरागा जाने यदि न स्यादैन्द्र
जालिकस्य जासं किंचिद्दृत्ता दृशं कथं चेतत्कथयेति स्वहृनिर्यंच णं शनैरगादीत् अहं चास्यैकांतेस्मिना
रव्यायतदानन संक्रांतेन संदेशेन सजनप्यसहचर्या निरतिशयाह्लादं तया निर्गलीकृतातिसत्कृतक
लिंगनाथस्यायदत्तया संगत्याग्रकलिंगराजश शीतस्यास्यादिशाालिलंघयिषितसंगागराजस्य साह
य्यकायालघीयसा साधनेनाऽत्यात्रे तेसखिजनसंगतस्य याद्दच्छिकदर्शनानंदराशिलंघितं चेता जातः
इति तस्य तत्कोशलं स्मितज्योत्स्नाभिषिक्तं दंतच्छदः सह सुहृद्भिरभिनंद्य विचित्रमिदं महासुनेर्दृत्तमपत्रै
वरवलुफलितमतिकष्टं तपस्तिष्ठतु भवान्नर्मसु सर्वस्य श्रोताः श्रोता सत्वयोर्देष्टमिह स्वरूपमित्यभिधाय
पुनरेव तत्र तु भगवानिति बहुश्रुते विकचराजीवसदृशं दृशं विक्षेपदेवो राजवाहनः सोऽप्यावचष्टे

॥ ॥इतिदंडिकृते दशकुमारचरिते मंत्रगुप्तचरितं नाम सप्तमउच्छ्वासः॥ ॥श्री॥ ॥देवमयापिप
रिभ्रमता विंध्याटव्यां कोपि कुमारः क्षुधा तृषा च क्लिश्यन्नलेशार्हः क्वचित्कूपाभ्याशे षष्ठवर्षदेशीयो दृ
ष्टः स च त्रासगद्गदमगदत् क्लिष्टस्य मे क्रियतामार्य साहाय्यकं अस्य मे प्राणापहारिणीं पिपासां
प्रतिकर्तुमुदकमुदंचन्निह कूपे कोपि निघल्लो ममैकशरणम्भूतः पतितस्तमलमस्मि नाहमुद्धर्तुमि
ति अथाहमभ्येत्य याकयापि व्रतत्या तमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पंचषैः
शरक्षेपोच्छ्रितस्य लिकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनि
षण्णस्तं जरन्तमब्रवं तात कस्तएष बालः को वा भवान्कथं चेयमापदापन्नेति सोऽश्रुगद्गदमगदत् श्रू
यतां महाभाग विदर्भो नाम जनपदस्तस्मिन्भोजवंशभूषणमंशावतार इव धर्मस्यातिसत्त्वः सत्यवा
दी वदान्यो विनीतो विनेता प्रजानां रंजितभृत्यः कीर्तिमानुदग्रो बुद्धिमूर्तिभ्यामुत्थानशीलः शास्त्रप्रमाणः

कदाचिदश्ववित्स्नागुणौघतिनदीष्णः कलासु नेदिष्ठो धर्मार्थसंहितासु स्वल्पेपि सुकृते सुतरां प्रत्युपक
र्त्ता प्रत्यवेक्षिता कोषवाहनयोर्यत्नेन परीक्षिता सर्वाध्यक्षाणामनुत्साहयिता कृतकर्मणामनुरूपैर्दान
मानैः सद्यः प्रतिकर्त्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनुमार्गेण प्रणेता चातुर्वर्ण्य
स्य पुण्यश्लोकः पुण्यवर्मा नामासीत् स पुण्यैः कर्मभिः प्राप्य पुरुषायुषं पुनरपुण्येन प्रज्ञानामगण्य
तामरेषु तदनन्तरमनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत् स सर्वगुणैः समृद्धोपि दैवाद्दण्डनीत्यां ना
त्यादृतोभूत् तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत तात सर्वै
वात्मसम्पदभिजनात्प्रभृत्यनूनैवात्रभवति लक्ष्यते बुद्धिश्च निसर्गपट्वी कलासु नृत्तगीतादिषु चित्रेषु च का
व्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रतिविशिष्यते तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेष्वनग्निसं
शोधितेव हेमजातिर्नातिभाति बुद्धिः बुद्धिहीनो हि भूभृदत्युच्छ्रितोपि परैरध्यारुह्यमाणमात्मानं न चेतयते न

७५

75

चशक्तःसाध्यंसाधनंवाविभज्यवर्त्तितुं अयथाहृतश्चकर्मसुप्रतिहन्यमानःस्वैःपरैश्चपरिभूयते नचाव
ज्ञातस्याज्ञाप्रभवतिप्रजानांयोगक्षेमाराधनाय अतिक्रान्तशासनाश्चप्रजाःयत्किंचनवादिन्योयथाकथं
चिद्वर्त्तिन्यःसर्वाःस्थितीःसंकिरेयुः निर्मर्यादश्चलोकोलोकादितोऽमुतश्चस्वामिनमात्मानंभ्रंशयेत्
आगमदीपदृष्टेनखल्वध्वनासुखेनवर्त्ततेलोकयात्रा दिव्यंचक्षुर्भूतभवद्भविष्यत्सुव्यवहितवि
प्रकृष्टादिषुचविषयेषुशास्त्रंनामाप्रतिहतवृत्ति तेनहीनःसतोरप्यायतविशालयोर्लोचनयोरन्धएव
जन्तुरर्थदर्शनेष्वसामर्थ्यात् अतोविहायबाह्यविद्यास्वभिषंगमागमयस्वदंडनीतिंकुलविद्यां तद
र्थानुष्ठानेनचावर्जितशक्तिसिद्धिरस्खलितशासनःशाधिचिरमुदधिमेखलामुर्वीमिति एतदाकर्ण्यस्था
नएवगुरुभिरनुशिष्टस्तथाक्रियतइत्यन्तःपुरमविशत् तांचवार्त्तांपार्थिवेनप्रमदासन्निधौप्रसंगेनोदीरिता
मुपनिशम्यसमीपोपविष्टश्चित्तानुवृत्तिकुशलःप्रसादचिह्नोपगीतनृत्तवादित्रादिघवाद्यबाह्यनारीपरायणः

राम॰
७५

पटुरयंत्रितमुखोवहुभंगिविशारदःपरमर्मान्वेषणपरःपरिहासयितापरिवादरुचिःपैशुन्यपंडितः
सचिवमंडलादप्युत्कोचहारीसकलदुर्नयोपाध्यायःकामतंत्रकर्णधारःकुमारसेवकोविहारभद्रो
नामास्मितएवमज्ञापयत् देवदेवानुग्रहणायकिंचिद्विज्ञापनंभवतिविभ्रतस्त्वमकस्मादुच्चावचैरुप
प्रलोभनैःकदर्थयंतःस्वार्थंसाधयंतिधूर्त्ताःतथाहिकेचित्त्वत्यकिललम्भेरभ्युदयातिशयेराशामुत्पा
द्यमुंडयित्वाशिरोबध्वादर्भरज्जुभिरजिनेनाच्छाद्यनवनीतेनोपलिप्यानशनंचग्राहयित्वासर्वस्वं
स्वीकरिष्यंतितेभ्योपिघोरतराःपाषंडिनःपुत्रदारशरीरजीवितान्यपिमोचयंति यदिकश्चित्पटुजा
तीयोनास्यमृगतृष्णिकायैहस्तगतंत्यक्तुमिच्छन्नमन्यैपरिवार्यहं एकामपिकाकिणींकार्षापण
लक्षमापादयेयमशस्त्राहतेसर्वशत्रून्घातयेयमेकशरीरमात्रमपिमर्त्यंचक्रवर्त्तिनंविदधीमहि यद्यस्मद्द्वे
नमार्गेणाचर्यतइति सपुनरिमान्प्रत्याहकोसौमार्गइति पुनरिमेब्रुवते ननुचत्वारोराजविद्यास्त्रयीवार्त्ता

७५
75

न्वीक्षिकी दंडनीतिरिति तासु तिसृषु त्रयीवार्त्तान्वीक्षिक्यो महत्योऽमंदफलाश्च तास्तावदासतां अधीष
तावद्दंडनीतिं येयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता सैवेयमधीत्य
सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमेति सत्यमित्यधीते शृणोति च तत्रैव जरां गच्छति तत्तु किल शास्त्रं शा
स्त्रांतरानुबंधि सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगम्यते भवतु कालेन बहुनाल्पेन वा तदर्थोऽधिगतः
अधिगतशास्त्रेणाचारादेव पुत्रदारमपि न विश्वास्यमात्मकुक्षेरपि कृते तंडुलैरियद्भिरियानोदनः संप
द्यत इत्योदनस्य पाकायैतावदिंधनं पर्याप्तमिति मानोन्मानपूर्वकं देयं उत्थितेन च राज्ञा क्षालि
ताक्षालिते मुखे मुष्टिमर्द्धमुष्टिं वाभ्यंतरीकृत्य कृत्स्नमायव्ययजातमन्हः प्रथमेऽष्टमे भागे श्रोतव्यं श
रावत एवास्य धिग्रामपहरंतीति तेऽध्यक्षवर्गाः चत्वारिंशतं चाणाक्योपदिष्टानाहरणोपायान्सहस्रधा
बुध्येव ते विकल्पयितारः द्वितीयस्यामेवं विवदमानानां प्रज्ञानामाक्रोशो दृश्यमानकराः कष्टं जीवति त

राम·
७५

त्रापिप्राह्निवाकारदयःस्वेछ्याजयपराजयोविरक्षानःपापेनाकीर्त्याचमन्त्रीरक्षात्मानंचार्थैर्योजयंति तृ
तीयेस्नातुंभोक्तुंचलभते भुक्तस्यचयावदन्नःपरिणामस्तावदस्यविषभयंनशाम्यत्येव भुक्त्वाचतु
र्थेहिरण्यप्रतिग्रहायहस्तंप्रसारयन्नेवोत्तिष्ठति पंचमेमंत्र चिंतायांमहांतमायासमनुभवति तत्रा
पिमंत्रिणोमध्यस्थाइवान्योन्यमिथःसंभूयदोषगुणौर्हृतचारवाक्यानिशंक्याशक्यतादेशकालका
र्यावस्थाःस्वेछ्याविपरिवर्त्तयंतः स्वपरमित्रमंडलान्युपजीवंति बाह्याभ्यंतरांश्चकोपानस्थानमुत्थाप्यप्र
शमयंतइवस्वामिनमवशमवगृह्णंति षष्ठेस्वैरविहारोमंत्रोवासेव्यःसदत्युत्तामयंस्वैरवि
हारकालोयस्पतिस्त्वत्रिपादोन्तरानाडिकाःसप्तमेचतुरंगबलप्रत्यवेक्षणप्रयासः अष्टमस्यसेनापति
सखस्यविक्रमचिंताक्लेशः पुनरुपास्यैवसंध्यांप्रथमेरात्रिविभागेगूढपुरुषाद्रष्टव्यास्तन्मुखेनचातिनृ
शंसाःशस्त्राग्निविषरसप्रतिबिधयोनुष्ठेयाः द्वितीयेभोजनानंतरंश्रोत्रियइवस्वाध्यायमारभते· तृतीये

तर्ध्यैघोषेराशंसविषम्वलुर्ध्येथंचमैशायीतकिल कथमिवास्याजस्त्रचिंतयासविह्वलमनसोवराकस्यनिद्रा
सुखमुपनमेत पुनःषष्ठेशास्त्रचिंताकार्यचिंतारंभः सप्तमेमंत्रग्रहोहूताभिप्रेषणानिचहूतास्त्रनामो
भयत्रप्रियाख्यानलब्धानर्थान्वीतशुल्कावाधंवत्मेनिवरीज्यायावर्द्धयेत्ततःकार्यमविद्यमानमपिलेशे
नोत्पादानवर्तंन्त्यमति अष्टमेपुरोहिताद्योभ्यत्येनमाहुः अघदृष्टेदुःस्वप्नेदुःस्थिताग्रहाःश
कुनानिचलाम्यशुभानिशांतपःक्रियतांसर्वमस्तुसोवर्णमेवहोमसाधनमेवंसतिकर्मगणावद्भवति
ब्रह्मकल्पाश्मैब्राह्मणाःकृतमेभिःस्वस्त्ययनकल्याणंतत्संभवतितेचाभीकष्टदारिआवहूयत्यायज्वा
नोवीर्यवंतश्चाघायप्रतिग्रहादंतैचेभ्यःस्वर्ग्यमायुष्यमरिष्टनाशनंचसंभवतीतिवहुदापयित्वातन्मुखे
नस्वयमुपांशुभक्षयेति ततदेवमहर्निशमसुखलेशमप्यासवहुलमविरलकदर्थनंचयतोतानयज्ञ
स्यास्यास्ताचक्रवर्तिताखंमंडलमपिदुराक्षमभवेत् शास्त्रज्ञसमाज्ञातोहियदृशातियन्मानयतियत्प्रियं

अब्रवीतितत्सर्वमतिसंधातुमित्यविश्वासः अविश्वस्यता हि जन्मभूमिर्लक्ष्म्याः यावता च नयेन लोकयात्रा
स लोकत एव सिद्धः न तत्र शास्त्रेणार्थः स्तनंधयोपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते तदस्या
तियंत्रणामनुभूयंतो यथेष्टमिंद्रियसुखानि येप्युपदिशंति एवमिंद्रियाणि जेतव्यान्येवमरिषड्वर्गस्या
जः सामादिरुपायवर्गः स्वेषु परेषु वाजस्त्रप्रयोज्यः संधिविग्रहं चिंतयेवनेयः कालः स्वल्पोपि सुख
स्यावकाशो न देय इति तैरथमिर्मंत्रिभिर्युष्मत्प्रयोपार्जितं धनं दासीगृहेष्वेव दृश्यते के वैते वराकाः
येपि मतिकर्कशास्तंत्रकाराः शुक्रांगिरसविशालाक्षबाहुदंतिपुत्रपराशरप्रभृतयस्तैः किमरिषड्वर्गो
जितः कृतं वा तैः शास्त्रानुष्ठानं तैरपि हि प्रारब्धेषु कार्येषु दृष्टसिद्ध्यसिद्धी एवं तथ्यापदृष्टिरतिसंधीय
माना बहवः न त्विदमुपपन्नं देवस्य यदुत सर्वं च घाजातिरयातयामं वयो दर्शनीयं वपुरपरिमाणा वि
भूतिः तत्सर्वं सर्वाविश्वासहेतुना सुखोपभोगप्रतिबंधिना बहुमार्गविकल्पनात्सर्वकार्येष्वमुक्तसंशये

७७
77

नंतंत्रावापेनंतंत्रावायेनमाकृथावृथा संतिहितेदंतिनां दशसहस्राणि हयानां लक्षत्रयं अनंतं चपादातं
अपिचपूर्णान्येवदेहमरत्नैः कोषगृहाणि सर्वस्थैवजीवलोकः समग्रमपि पुरसहस्रं भुंजानो न तेकोष्ठा
गाराणिरचयिष्यति किमिदमयथार्थमयद्रव्यार्जनायासः प्रस्तूयते जीवितं हि जन्मवतां चतुःपंचान्यहानि
तत्रापि भोगयोग्यमल्पाल्पवयःखंडमंडिताः पुनरर्जयंतएव ध्वंसंतेनार्जितस्यवसुनो लवमप्यास्वा
दयितुमीहंते किंबहुना राज्यभारं भारक्षमेष्वंतरंगेषु भक्तिमत्सु समर्थोसरः प्रतिरूपाणि सेतः पुस्तिकाभीर
मभारतीगीतसंगीतपानगोष्ठीष्वयथयन्नु बंधमथाहं कुरुशरीरलाभमितिपंचागस्पष्टस्मिरंजलिचुं
वितरूउच्चैरमशोत्त प्राहसोऽपि पीतिफुल्लचनोंतःपुरजनमदाजनः जननाथश्च सस्मितमुत्तिष्ठन्ननुहि
तोपदेशाकुरवो भवंतः किमितिगुरुत्वविपरीतमनुष्ठितमिति तमुत्थाप्यक्रीडानिर्भरमतिष्ठत् अथै
तेषुदिनेषुमस्योऽन्यः प्रस्तुतेऽर्थेप्रार्थ्यमानो मंत्रिवृंदेनवचसाभ्युपेत्य मनसैवाचिंतत् इत्यवज्ञातवान्

राम.
७७

अथैवं मंत्रिणो मनस्यचिंतयत् अहो मे मोहाद्बालिश्यमनुचितेर्थे चोदयन्नस्मिगतोहमस्य हास्यो जातः
स्पष्टमस्य चेष्टानामायथाप्येवं तथाहि न मां स्निग्धं पश्यति न स्मितपूर्वं भाषते न रहस्यानि विवृणोति
न हस्तेन स्पृशति न व्यसनेष्वनुकंपते नोत्सवेष्वनुगृह्णाति न विलोभनवस्तूनि प्रेषयति न मत्सुकृ
तानि प्रगणयति न मे गृहवार्त्तां पृच्छति न मत्पक्ष्यान्समवेक्षते न मामासन्नकार्येष्वभ्यंतरीकरोति न
मामंतःपुरं प्रवेशयति अपि च मामनर्हेषु कर्मसु नियुंक्ते मदासनमन्यैराक्रम्यमानमनुजानाति
मद्वैरिषु विश्रंभं दर्शयति मदुक्तस्योत्तरं न ददाति मत्समानदोषान्विगर्हयति मर्मणि मामुपहसति
स्वमतमपि मया वर्ण्यमानं प्रत्यवक्षिपति मदाहृतानि वस्तूनि मत्सहितानि नाभिनंदति नयज्ञानां वलि
तानि मत्सभक्षं मूर्खैः रूढापयति सत्यमाह चाणाक्यः चित्तज्ञानानुवर्त्तिनो नर्था अपि प्रियाः स्युः दक्षिणाश्च
पितद्गाववहिष्कृता द्वेष्या भवेयुरिति तथापि का गतिरविनीतोपि न परित्याज्यः पितृपैतामहेऽस्मादेशेरयम

धिपतिः अपरित्यजंतोपि कमुपकारमश्रयमाणा वाचः कुर्मः सर्वथा नयज्ञस्य वसंतभानोरश्मकेंद्रस्य
हस्ते राज्यमिदं पतितं अपिनाम यदोभाविन्यः प्रकृतिस्थमेन मायाद्ध्येपुः अनर्थेषु सुलभव्यलीके
षु कविदुत्पन्नोपि दोषः सद्यन्नमस्मै रोचयेत भवतु भावी तावदनर्थः स्तंभितपिशुनजिह्वो यथाकथंचि
दस्मत्प्रयदत्तिष्ठयमित्येवं गते मंत्रिणा राजनियका महत्तेचंद्रपालितो नामाश्मकेंद्रामात्यस्य द्रुयालित
स्यपस्त्रलुः सहद्भः पितृ निर्वासितो नाम मूल्लावद्रुमिश्चारणो बंधीभिरनल्पकोशलाभिः शिल्पकारिणीभिर
नेकछत्रकिंकरैश्चगूढपुरुषैः परिवृतोभ्येत्य विविधाभिः क्रीडाभिर्विहारभद्रमात्मसादकरोत् अमुना
चैवसंक्रमेण राजन्यास्यरमलभत लब्ध्वरं ध्रुवोभ्येत्य विविधाभिः श्चासयद्व्यसनमारभतेतत्तन्नदिस्वर्णपि
त् देवयथाम्गयाल्यापकारिकी न तथान्यत् अत्र हि व्याख्या नोत्कर्षो रागस्तत्प्रकर्षोद्दीर्घाध्वलंघनश
भोजं घाजवः ककापचयादारोग्ये कम्मलमाञ्ञायाग्निदीप्तिर्मदोपकर्षोदंगानां स्थैर्यं कर्कश्यातिलाघ

७८

78

राम॰

७८

वानिर्जितोपजवातवर्षक्षुत्पिपासासहत्वं सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानं हरिणगवलगवया
दिवधेन सस्थलोपप्रतिक्रिया। वृकव्याघ्रादिघातेन स्थलपथ्यशोधनं शैलाटवीप्रदेशानां विविध
कर्मक्षमाणामालोचनमाटविकवर्गविस्रम्भणं। उत्साहशक्तिसंधुक्षणं प्रत्यनीकवित्रासनमिति
बहुतमा गुणाः। एतेपि द्रव्यराशेस्तृणावल्यागादनुपमानमाशयौदार्यं जयराजयानवस्थानादुःष
विषादयोरविधेयत्वं पौरुषैकनिमित्तस्यामर्षस्य वृद्धिरक्षहस्तान्तस्थादिगोचराणामत्यन्तदुरुपल
क्ष्याणां कूटकर्मणामुपलक्षणात्स्वान्तवृत्तिनैपुण्यमेकविषयोपसंहाराच्चित्तस्यैकाग्र्यमध्यवसा
यसहचरेषु साहसेष्वभिरतिरतिकर्कशपुरुषप्रतिसंसर्गादनन्यधैर्येणीयता मानावधीरणामक्ष
पणां च शरीरयापनमिति। उक्तमागनाभोगप्यर्थधर्मयोः सफलीकरणं पुष्कलः पुरुषाभिमानोभावतान
कौशलमलोभक्लिष्टमाचेष्टितमखिलासु कलासु वैचक्षण्यमलब्ध्योपलब्धिर्लब्धानुरक्षणाद्रक्षितोपभो

गभुक्तानुसंधानरूष्टानुनयादिषु जस्त्रमभ्युपायरचनया बुद्धिवाचोः पाटवमुत्कृष्टशारीरसंस्कार
त्वतुभगवेषतया लोकसंभावनीयता· परंसुहृत्प्रियत्वं· गरीयसी परिजनव्यपेक्षा· स्मितपूर्वाभि
भाषित्वमुद्रिक्तसत्त्वता· दासिगणानुवर्त्तनमपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति पानेपि
नानाविधरोगमार्गप्रदीपसामासेवानामासेवनामासेवनामासेवनात्स्पृहणीयवयोव्यवस्थापनम
हंकारप्रकर्षादेशोषदुःखतिरस्करणमंगजरागदीपनादंगनोपभोगशक्तिसंवुक्षणमपराधप्र
मार्जनान्मानशल्योन्मार्जनमशाठ्यशंसिभिरनर्गलप्रलापैर्विश्वासोपबृंहणममत्सरानुबंधा
दानंदैकतानतां शब्दादीनामिंद्रियार्थानां सातत्येनानुभवः संविभागशीलतया सुहृद्वर्गसंवर्गणमन
नुपमानर्मगल्लावणपमनुत्तरणाविलसितानि भयनिराकरणाच्च सांग्रामिकत्वमिति वाक्यारूप्यं
दृढोदाहरणारूपणानि वार्धानामेव यथावकाशमोपकारिकाणि न हि मुनिरिव नरपतिरुपशामर

तिरभिभवितुमरिकुलमवलंवितुंचलोकंतंत्रमिति असावपिगुरूपदेशमिवात्याद्रेणातस्यमतमन्व
वर्त्तत तच्छीलानुसारिणश्चप्रकृतयोविशरवल्लमसेवतव्यसनानि सर्वसमानदोषतयानकस्यचिछिद्रा
न्वैर्क्षत तच्छीलानुसारिणश्चप्रकृतयोव्यगायायतिष्ट समाहृत्यप्रकृतयस्तत्राध्यक्षाःस्वानिकर्मफ
लान्यभक्षयन् ततःक्रमात्सायवाराणीव्यशीर्यंत व्यययमुखानिविरविधयतयोविभोरहरहर्व्यवर्द्धंत ततःसा
मंतपौरजनियदमुख्याश्चसमानशीलतयोपारूढविश्रंभेणराज्ञासजातपःपानगोष्ठीष्वभ्यंतरीकृताःस्व
माचारमत्यचारिषुः तदंगनामुखानेकापदेशपूर्वमपाचरंत्रेरहः ततःपुरेषुवामीभिन्नवृत्तेषुमंदत्रासाव
हुमुखैरवर्त्तंत सर्वश्चकुलांगनाजनःपांसुलभंगीभाषणारतोभ्यच्चारित्रयंत्रणांस्तृणायापिनगणयि
त्वाभर्तृन्जारगणामेत्राणपश्चगोत तस्मूलाश्चकलहाःसामर्षाणांमुदभवन् अहन्यनदुर्वलाबलिभिः
अपहृतानिधनवतांधनानितस्करादिभिरूपहतपरम्परतयःप्रहृताःपातकपथाःहतवोधवास्तविन्नावबं

८०

धातुराश्च मुक्तकंठमाक्रोशन्नक्रकव्यः प्रजाः दृष्ट्वा यथाप्रहितो भयक्रोधावजनयत् क्रशकुटुंबेषु
लोभः पदमबध्नात् विमानिताश्च तेजस्विनो मानेनादह्यंत तेषु तेषु नाष्ठुत्सेषु प्रासरत्परोपजापाः तदा च मृग
युवेषेणाम्रगवाहुल्यवर्णनेनाद्रिद्रोणीरनपसारमार्गाः शुष्कतृणावंशगुल्माः प्रवेश्य द्वारतोऽग्निविस
र्गैर्व्याघ्रादिवधं प्रोत्साह्यतन्मुखपातनेनैष्टकूपतस्तोयासादनेनातिदूरहारितानां प्राणाहारिभिः क्षु
त्पिपासाभिवर्धनेन गुल्मतृणगूढछन्नतटप्रपातहेतुभिर्विषममार्गप्रधावनेन विषमुखीभिः शुष्कास्का
भिश्च रणाकंटकोद्धरणैर्विद्धविसरविच्छिन्नानुयातृतयैकीकृतानां यथेष्टघातनेन मृगदेहापराद्धेनाम
पुमोक्षसतेः सपदा बंधमधिकृत्याड्रिगारिरुधिरोहारणपनन्मलक्ष्यैः प्रत्यंशनेराटविकलमनाविपिनेषु
विरलसैनिकानां प्रतिरोधनेरक्षघ्नतपस्विषु छयात्रोत्सवादिसंकुलेषु बलवद्वनुप्रवेशनैरितरेतरेषादि
सोत्सादनैर्गृहदाहादितव्यलीकभ्यो प्रियारातिलब्ध्वा साक्षिषु तद्विख्यातकीर्तिगुप्तिहेतुभिः पराक्रमैःप

रकलत्रेषु स्तुहस्तेनाभियोऽप्यजाराम्मर्त्यं नु मयं वा प्रहस्त्यतत्साहसोपन्यासैर्योगनारीहारितानां संके
तेषु प्रागुपनिलीय पश्चाद्धाभिद्रुत्या कीर्त्तनीयैः प्रमापसौ रूपप्रलोभ्य विलप्रवेशेषु निधानखननेषु
मंत्रसाधनेषु च विघ्नव्याजसाध्यैर्व्यापादनैर्मत्तगजाधिरोहणाय प्रर्थ्य प्रसपाय निवर्त्तनैर्व्यालहस्ति
नं कोपयित्वा लक्ष्मीकृतमुख्यमंडलेषु पक्रमरोर्दायाद्यर्थे विवदमानानुपांशु हत्वा प्रतिपक्षेष्वथ
ग्राः पातनैः सामंतपुरजनपदेष्वयथावृत्तान प्रकाशमभिप्रस्त्यतद्वैरिनाम घोषणौ यौगांगनाभि
रहर्निशमभिरमण्य राजयक्ष्मोत्पादनैर्वेसन्नाभरणामाल्यांगरागादिषु रसाधानकौशलेनाश्चिकित्सासु
रेवनामयायर्हहरणैरन्यैरप्युपायैश्च प्रक्षपित प्रवीरमनंतवर्मकटकमस्मकेंद्रप्रयुक्तास्तीक्ष्णा रसा
द्यातज्जैरमकुर्वन् अथवसंतभानुवर्माणां नामवानवास्य प्रोत्साहयानंतवर्मणा व्यग्राहयत् तस्य
रामरष्ट्राष्ट्रस्थानंतवर्मा तमभियोक्तुं बलसमुत्थानमकरोत् सर्वसामंतेभ्यश्चाश्मकेंद्रः प्रागुपेत्य प्रिय

ततोऽमू तत्र अपरेऽपि सामन्ताः समगंसत गत्वा चाम्मरातिं नर्मदारोधसि न्यविशन् तस्मिंश्चावसरे महासा
मन्तस्य कुन्तलपतेरवन्तिदेवस्यात्मनाटकीयां क्ष्मातलोर्वशीं नाम चन्द्रपालादिभिः रतिप्रशस्तं नृत्ते कौश
लामाहूयानन्तवर्मा नृत्तमद्राक्षीत् अतिरक्तश्चासु त्तवानिमां मधुमत्तां अश्मकेन्द्रस्तु कुन्तलपतिमे
कान्ते समभ्यधत्त एष राजा कलत्राणि नः परामृशति किं यत्त्वया सोढव्यं मम शतमास्ति हस्तिनां पं
च शतानि च तेन तदावां संभूय मुरलेशं वीरसेनमृचीकेशमेकवीरं कोङ्कणपतिं कुमारगुप्तं च नासि
क्यनाथं च नागपालमुपजपाव स्ते चावश्यमस्याविनयमसहमाना अस्मन्मतेनैवोपवर्त्स्यन्ते अयं
च वानवास्यः प्रियमेमित्रममुनैन दुर्विनीतमयत्तो व्यतिपक्ष एष ततः प्रहरेम कोशवाहनं च विभज्य गृह्णी
म इति हृष्टेन चामुनाभ्युपेतं विंशतिं वराङ्गुकानां पञ्चविंशतिं काञ्चनकुङ्कुमकम्बलानां प्राभृतीकृत्यासं
मुखेन तैः सामन्तैः समन्त्रतानपि स्वमतानस्थापयत् उन्नेरेघ तेषां सामन्तानां वानवास्यस्य चानन्तवर्मा

नयद्वेषाद्वानिषल्लमगामत् । वसंतभानुश्चतत्कोशागाद्दनमवशारीमात्माधिष्ठितमेवहूलायश्चाप्रया
संयथावलंचगृहीतपुष्परनुजयायेनकेनचिद्दैशनाहंतुष्यामीतिशाप्यात्सर्वानुवर्त्तीतिनेवा
मिषेणानिमित्तीकृत्योत्पादितकलहः सर्वसामंतान ध्वंसयत् । तदीपंचसर्वस्वंस्वयमेवाग्रसत्वान
वास्यचकेनचिद्देशनानुगत्यप्रस्थानन्तसर्वमंनतवर्मराज्यमात्मसात्करोत् । अस्मिन्नंतरे मंत्रिवृ
द्धावसुरक्षितः केश्चिद्दैवलैः संभूयत्वालमेनभानुवर्मीराममस्यैवज्ञायसीभगिनीत्रयोदशवर्षीम
नुवादिनीमन्योन्यमातरं महादेवी वसुधरांनामादाय सर्वज्ञापदेस्याभावितयादाहज्वरेणादेहम
जहात् । अस्मादेशेमितैस्तनीलामाहिष्मतीभर्त्तुर्हेमातुरायश्चाद्येमित्रवर्मणोसापत्न्यादेवीरक्षिताम
त् । तो चार्यामनार्यौ सावन्यथाप्यमन्यत निर्भर्त्सितश्चतयासुतमियमरंवउचारित्राराज्याहे चिकीर्षेती
तिनेर्घ्यापात्रमेनवालमजिघांसत् । इदं तु ज्ञात्वादेव्याहमाज्ञमत्तातनालीजंघजीवतानेनाभर्केण

८२

82

यत्रत्वं कविद्वधाय जीवञ्जीवेयं चेदहमथेनमनुसरिष्यामि तत्रापयस्व मां क्षेमप्रवृत्तस्त्ववार्त्तामिति अहं तु स
कुले राजकुले कथंचिदेनं निर्गमय्य विध्याटवीं व्यगाहिषि पादचारदुःस्थितं चैनमाश्वासयितुं घोषं क्व
चिद्हानिकानि चिद्विश्रमय्य तत्राणि राजपुरुषसंपातभीतो दूरमपसरन्नत्रास्य दारुणा पिपासापीडित
स्य वारि दातुकामः कूपेऽस्मिन्नपभ्रश्य पतितस्तस्यैव च धनुर्गृहीतस्त्वमेवास्यातः शरणमेषि विशरणस्य
राजसूनोरित्यञ्जलिमबध्नात् किमीयाज्जात्यास्य माता तन्मनुप्रयुक्ते मयाऽसुनोक्तं पाटलिपुत्रिकस्य वणिजो
वैश्रवणस्य दुहितरि सागरदत्तायां कोसलेन्द्रात्कुसुमधन्वनोऽस्य माता जातेति यद्येवमेतन्माता मे स्वसा तु मे
को मातामह इति सस्नेहं तमहं सस्वजे वृद्धेनोक्तं सिंधुदत्तापुत्राणां कतमस्ते पितेति सुश्रुत इत्युक्ते सा
त्यस्थ्यमत् अहं तु तत्र यावल्लिप्तमरममके द्रुनयेन वो मलूत्यवालभवनं पितृपदं प्रतिष्ठापयेयमिति प्रतिज्ञा
यकेयमस्यजांस्तु बक्षप्येयमित्यचिन्तयं तावदापतितौ चकस्यापि व्याधस्य द्वौ निघ्नतौ स्यकौ मृगौ सव्या

एम॰
८२

घः तस्यहस्तादवशिष्टमिषुद्वयंकोदण्डंचाक्षिप्याविध्यं एकमश्वसपत्राकृतोन्यश्चनिष्पत्राकृतोऽप
तत् तंचैकंमृगंहत्वामृगयावन्यस्यापलोमत्वचः श्रोणिमांसमुद्धृत्यनिष्कुलाकृत्यनिकृत्यार्द्रवल्लिप्राग्रादिमुल्
लाकृत्यसद्यावांगारेषुतप्तेनामिषराशिनातर्पयात्मनश्चक्षुधमत्यनार्थशतस्मिन्क्षणेमेरीमसौमुष्टिदेनातिहृष्ट
किरातमस्मिपृष्टवान् अपिजानासिमाहिष्मतीहन्तुंतमिति असावाचष्ट तत्रव्याघ्रवचोऽहतोश्वि
कीयाद्येवाऽगतः किंनजानासि प्रचण्डवर्मानामचण्डवर्मानुजोमित्रवर्मदुहितरंमञ्जुवादिनींविलिप्सुर
भ्यागतोतितिनोत्सवोन्नरापुरीति अथकरौज्जोरीमब्रवं धूर्त्तोमित्रवर्मादुहितरिस्वप्रपक्षपातिपत्न्यामात
रं विश्वास्यतन्मुखेनप्रत्याहृष्यबालकंजिघांसति तत्प्रतिगत्यकुशलमस्यमदाज्ञोचदेव्यैरहोनिवेद्य
पुनःकुमारःशार्दूलरक्षितइतिप्रकाशमाक्रोशःकार्यः सदुर्मतिरतःप्रीतोवहिर्दुःखंदर्शयन्देवीमनुने
ष्यति पुनस्तयात्वन्मुखेनसवाच्यः यदपेक्षयात्वन्मतमत्यक्रमियंसापिबालःपापेनमेपरलोकमगात्

८३

83

अद्यतुलरादेशकारिणेयवाहमिति सतथोक्तः प्रीतिंप्रतिपद्याभियत्स्यति पुनरनेनवत्सनाभनाम्नाम
हाविषेणासन्नीयतेयंतत्रमालांमज्जयित्वातयासवक्षसिमुखेचहंतव्यःसएवायमसिप्रहारःपायी
यसस्त्वभवतुयद्यस्मियतिअतःपुनरनेनागदेनसंगमितेभक्षितांमालांमज्जयित्वास्वदुहित्रेदेयाम
तेतुतस्मिन्क्षणेसाचनिर्विकारांगासत्यासतीत्येवेनांप्रकृतयोनुवर्त्तिष्यंते पुनःप्रचंडवर्मणासंदेशःअ
नायकमिदंराज्यमनेनैवसहबालिकेयंस्वाकार्येति तावदाबांकापालिकवेषच्छन्नौदेव्यैवदीय
मानभिक्षोपुराद्बहिरूपश्मशानेवत्स्यावः पुनरार्यप्राणाम्योरद्धस्थानामांश्चमंत्रिद्धस्थानेकांतेब्रवीतु
देवीस्वप्नेयदेव्यविद्यमवासिन्याकृतःप्रसादः अद्यचतुर्थेहनिप्रचंडवर्मामरिष्यति॰ पंचमेहनिरेवात
टवर्त्तिनिमग्नवनेपरीक्ष्यवैडनताजनेषुनिर्गतेषुकपाटमुद्घाटयत्वत्ततेनसहकोपिद्विजकुमारोनिर्या
स्यतिसराज्यमिदमनुपालयद्बालांतेप्रतिष्ठापयितिसखलुबालोमयाव्याघ्रीरूपयातिरस्कृतस्त्रायितः॰सा

स्म॰
८३

वेयंवत्साम‌ञ्जुवादिनीतस्यद्विजातिदारकस्य दारत्वेनैवकल्पितेति तदेतदतिरहस्यं युष्मास्वेव गुप्तं ति
ष्ठतु यावदेतद्युपयत्स्यत इति समांप्रतमित्यतिप्रीतः प्रयातोऽर्थश्चायं यथाविंतितमनुष्ठितोऽभूत् प्र
तिदिशं च लोकवादः प्रासर्पत् अहो माहात्म्यं पतिव्रतानामसि प्रहार एव हि समालापहारस्तस्मिन्ना
गेन शक्यामुपधियुक्तमेतत्कर्मेति वक्तुं यतस्तदेवनंदाम दुहितेव स्तनजमंडनमस्येज्जातं न चास्तु यों ऽ
स्याः पतिव्रतायाः शासनमतिवर्तेत सभस्मैव भवेदिति अथ महाव्रतिवेषेण मामाश्च पुत्रं च भिक्षायै प्रवि
ष्टो दृष्ट्वा मस्तुतत्तनो प्रत्युत्थाय हर्षकलमब्रवीत् भगवन्नपमंजलि रक्षा योयं जनोनुगृह्यतामस्ति
ममैकः स्वप्नः सकिंस्यो नेति मयोक्तं फलमस्याद्यैव द्रक्ष्यसीति यद्येवं बहुभागधेयमस्यावोदास्याः
सत्कलत्रस्याः सानाद्य प्रशंसी स्वप्न इति मद्दर्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणाममध्यभूत्यापि साहर्ष
गर्भमब्रूत तवेयं मिथ्या सोयं पुष्पदंतो यो बालकः कपालोऽश्वो मया निरादिव्यः इति मयापि सस्मितं मञ्जु

८५

85

वाद्दिनीरागादीन् हृष्टिलीटधैर्यैर्गोतोवमस्त्विति लब्धमैक्षोनालीजंघमकार्य निर्गम्य ततश्चैतं चानुयांतं
ज्ञानेरष्टछक्तासावल्यायुः प्रथितश्चंडवर्मेति सोऽद्भुत राज्यमिदं ममेत्यया त्तशकोरा जास्थानमंडप
दतिष्ठत्तुपास्यमानः कुशीलवैरिति यद्येवमुद्यानेतिष्ठेतिं तंजरंतमादिश्य ततयाकारैकपार्श्वे कस्यांचि
च्छ्रमम ठिकायां मात्राः सम भवतार्यतदृक्षगानियुक्तराजपुत्रः हतकुशीलववेषः प्रचंडवर्मा रामेत्या
न्वरंजयं अनुरंजितांतश्च सम्मयेडनसमानज्ञानोपयोगी संदृष्टनन्तगीतनानाकदिलादिहस्तंवक
मरामर्षं पादाल्लातयादापीडहृष्टिक मकरलंघनमत्स्योद्वर्त्तनादीनि चक्रकरणानिपुनरादायासत्रंव
र्निनांछुरिकास्ताभिरुपहितवर्मा चित्रदुष्करागिकरणानिश्पेनोत्पातोत्क्रोशपातादीनि दर्शयन्विश
तिचापांतरालावस्थितस्य प्रचंडवर्मराच्छुरिकयैकया प्रत्युरसं प्रहृत्य जीयाद्धर्षसहस्तंवसंतभानुरि
त्यभिगर्जन्नफात्रमुत्कत्तुमुद्यतासेः कस्यापिचारभटस्पर्धावरांसबाहुशिखरमाक्रम्य तावतेवततविचेती

राम०
८५

कुर्वन्नाकुलंचलोकमुन्मत्त कुर्वन्निव पुरुषोच्छ्रितप्राकारमत्युलंघयं अथवत्सचोपवनेमरन्नुपाति
नामेघयथादृश्यतइतिब्रुवाणाः वनालीजंघसमीकृतसेकतास्पृष्टपदन्यासयातमालवीष्माचारु
प्राकारंप्राप्याप्रधाविताः पुनरेवाचोच्छ्रितैकलादलक्षपातेनप्रद्रुत्यलंघितप्राकारेवप्रस्रवातवलयस्तत्सं
सत्स्यमठिकायांतत्रैवप्रविश्यप्रतिमुक्तपूर्ववेषःसहकुमारेणामत्र्येनतुमुलराजद्वारदुःखलब्ध
वर्त्माश्मशानोद्देशमभ्यगाम् प्रागेवतस्मिन्दुर्गागृहेप्रतिमाधिष्ठानएवमयाकृतमभयपार्श्वेष्ठौयेस्थूल
प्रस्तरस्थगितबाह्यद्वारंविलं अथगलतिमध्यरात्रेवर्षेवर्णेपनीतेमहार्हेरत्नभूषणापदेनिवसनोत
च्छिलमावांप्रविश्यतस्मिन्नतिष्ठाव देवीतुपूर्ववद्धरेवयथार्हमग्निसंस्कारंमालवायदत्वाप्रचंडवर्मणोवं
डवर्मणोचतामवस्थामश्मकेंद्रापधिकृतामेवसंदिश्यान्तेरथःप्रत्युषस्येवपूर्वसंकेतितपौरामात्यसा
मंतवृद्धैःसहाभ्येत्यभगवतीमर्चयित्वासर्वजनप्रत्यक्षपरीक्षितकुक्षिवेजनस्यतद्भवनंविधायसंदत्त

८५
85

हरिः सहजेनेनस्थितापदीयांसंघरहशब्दमकारयत अत्रानुतरंध्रप्रविष्टेनतेननादेनाहदत्तसर्वः
शिरसेवोत्क्षिप्यसप्रतिमंलोहपादपीठमंसलपुरुषप्रयत्नदुश्चलमुभयकरविधृतैकपार्श्वमेक
तोनिवेश्यनिरगामंनिरगामयंचकुमार अथयथाप्रसुरसमर्थयित्वादुर्गोमुद्घाटितकपाटः प्रत्यक्षीभूय
प्रत्ययहृष्टहरिस्थघरेमांचमुपगता उत्तिंहरूढविस्मयंच प्रणिपततीः प्रकृतीरभ्यधाम् इत्थं देवीविं
ध्यवासिनी मन्मुखेनसुखानाज्ञापयति मयासहरूपयाशार्दूलरूपेणातिरस्कृत्याघयोद्दत्तेत्तमेन
मद्यप्रभृतिमत्सुन्नतयाऽमरमात्यपक्षइतिपरिग्रहणुभवंतः अपिदुर्घटकूटकोटिघटनापाटवप्रक
टशात्मनिष्ठुरात्मकाघटघहनात्मानंमामग्मन्यमस्मारक्षितारम् रक्षानिर्देशश्चास्यसर्वसंयमुश्चरव
मातामनार्थयेति श्रुत्वेतरदहोभाग्यत्वान्मोजनंशोधस्यत्वमार्यादत्तोनाधकृत्यपीयंतप्रकृतयः सातु
वाचामगोचरां हर्षावस्थामस्पृशन्नेश्वश्रूः तदहरेवचयथावदयाहयन्मंजुनादिनोपारोपल्लव प्रय

रा०म०
८५

त्रायांचयामिम्यांसम्प्रयोगेदविलंप्रत्यपूरयेयम्‌ अलब्धरंध्रश्चलोकोनष्टमुष्टिचिंतादिकथनैरस्मुपायां
तरप्रयुक्तेर्द्विव्यांशतामेवसमस्तमर्थयमानोमहाराज्ञांनास्य वर्तते राजपुत्रस्यार्यापुत्रइतिप्रभावहेतुः
प्रसिद्धिरासीत्‌ तंचगुणावत्यक्तिमद्राकृतमुपनाय्यपुरोहितेनपाठयन्नीतिराजकार्याणापन्नतिष्ठ
श्च चिंतयंचराज्यंनामशक्तित्रयायत्तं॰शक्तयश्चमंत्रप्रभावोत्साहजापरस्यराज्ञुगृहीताःकृत्स्नेषुक्र
मंत्रेणाहिविनिश्चयोर्थानां॰प्रभावेनप्रारंभउत्साहेननिर्वहणामतःपंचांगमंत्रमूलोद्विरूपप्रभा
वस्कंधश्चतुर्गुणोत्साहविटपोद्विसप्ततिप्रकृतिपत्रःषड्गुणाकिसलयःशक्तिसिद्धिपुष्पफलश्चन
यवनस्पतिर्नेतुरूपकरोति सचायमनेकाधिकरणात्वादसहायेनदुरुपजीव्यः यस्त्वयमार्यकेतुर्नी
ममित्रवर्ममंत्रीसकोसलाभिजनत्वात्कुमारमातृपक्षोपमंत्रिगुणैश्चयुक्तस्तन्मतिमेवमत्येवबध्वस्तो
मित्रवर्मासचेल्लब्धःपेशलमिति अथनालीजंघरहस्यमिक्षयंतातार्यकेतुमेकांतेब्रूहिं॰कोन्वेषमा

यात्पुरुषोयदस्माराजलक्ष्मीमनुभवति सवायमस्मद्बालोभुजंगेनामुनापरिगृहीतः किमुकीर्येत
ग्रस्येतवेति सयदद्दिष्यतित्तदस्मिन्बोध्य इति सोऽस्य देवंमामावेदयतमुद्दुरूपास्यप्राप्य तैः श्रवनर्मोचि
त्राः कथाः संवात्प्ययाणिपादमतिविस्रंभदन्तक्षणांतमप्राक्षल्लदुपदिष्टेननयेन सोप्येवमकथयत
मुद्रमेवंवादीरभिजनस्यशुचिदर्शनमसाधारणांबुद्धिंनैपुणमतिमानुषंप्राणावलंमपरिमाणा
मौदार्यमत्याश्चर्यमस्त्रकौशलमनल्पंशिल्पज्ञानमनुग्रहार्द्रंचेतस्तेजश्चाप्यपरविषह्यमभ्यमित्री
णामित्यस्मिन्नेवसन्निपातितागुणायन्यत्रैकैकशोपिदुर्लभाः द्विषतांचिलिविलिङ्गुमःप्रक्वानांतु
चेदमतरुस्तमुद्धत्यनीतिज्ञमन्यमश्मकमिमंचराजपुत्रमनेनपित्र्येपदेप्रतिष्ठितमेवविद्धिनात्रसंश
यःकार्य इति तच्चापिश्रुत्वाभूयोभ्यःपश्चापथाभिर्विशोध्यतंमेमतिसहायमकरवं ततस्तरवश्चसत्य
शौचयुक्तानमात्यान्विविधव्यंजनाश्चगूढपुरुषान्दुर्दयादयं तेभ्यश्चोपलभ्यलुब्धेसमरूमतुल्सि…

मविधेयप्रायंचप्रकृतिमंडलमलुब्धतामभिव्याप्य धार्मिकत्वमुद्भावयन्नास्तिकान्कदर्थयन्कंटका
न्विशोधयन्नमित्रानुपधीकृत्य संख्यातुर्वर्ण्यं च स्वधर्मकर्मसु स्थापयन्नभिसमाहरेयमर्थान् अर्थमल्ला
हिदं उविशिष्टकर्मारंभाः नचान्यदस्ति पापिष्ठतमं दौर्बल्यादिसाकल्यप्रयोगानन्वतिष्ठम्॥ ॥
इति दंडिनः कृतौ दशकुमारचरिते विश्रुतचरितं नामाष्टम उच्छ्वासः समाप्तश्चायं दंडिकृतो दश
कुमाचरिताभिधो ग्रंथः॥ ॥ल॥ ॥संवत १८३२ चैत्रादिमासे शुक्लपक्षे द्वितीयायां गुरुवासरे॥ ॥

काव्य

दसकमारका पत्र १६०

३२००

१८